Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५१६

Title संस्कार रत्नावली

Author श्री नृसिंहः

Extent ५८ Age ×

Subject धर्मशास्त्रं

संस्काररत्नावली

४५१७

धर्मि·

संस्काररत्नावली

नं२ हेर नंचे

श्रीगणेशाय नमः। अथावसथ्याधाने पूर्वोक्ताधानकालस्य दैववशादतिक्रमे प्रायश्चित्तं कुर्यात्। तत्र कात्यायनः। कृतदारोग
१ हे ज्येष्ठो यो नादध्यादुपासवै। चान्द्रायणं चरेद्वर्षं प्रतिमाससमश्नोऽपि वा। तथा कालेऽत्याधायकर्माणि कुर्याद्विप्रोऽघ्नानापदि। त
दकुर्वंस्त्रिरात्रेण मासि मासि विशुध्यति। यद्वा। तथा यावंसद्वान्यतीतानि निरग्नेर्विप्रजन्मनः। तावंति कृच्छ्राणि चरेद्धौम्यं द
द्याद्यथाविधि। तथा। यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः। तद्धौ वविप्रेभ्यो यथाहोमस्तथैव तत्। तद्यथा॥ अथातः
मतश्चतुर्थीकर्मोत्तरकालं आतमतो विभागाद्वर्ध्वं पितरि मृते वा मातरि मृताया वा निरग्निकत्वेन यावंतः संवत्सरा अ
तीताः। तावंतः कृच्छ्राः प्रायश्चित्तं। यदि हिरण्यादिदानेनक्रीयते तदा एवमेव तत्र प्राजापत्यलक्षणं। अहं प्रातः अहं
सायमिति मन्त्रायुक्तं। तदसंभवेत्। कृच्छ्रं देयमुतं चैव प्राणायामशतत्रयं। तिलहोमसहस्रं तु सममेतत्त्रयमिति। त
या प्राजापत्यक्रिया शक्तौ धेनुं दद्याद्विचक्षणः। धेनोरभावे दातव्यं तुल्यं मौल्यं न संशयः। तन्मौल्यं तु। निष्कं निष्कार्धपादं वा पं
चकर्षापणानि वा। त्रिकार्षापणमन्यथा वा शक्तितो मौल्यकल्पना। ततो प्रायश्चित्तद्रव्यं दद्यात्। तद्यथा। ताम्रपात्रं तोयपूर्णं एम
यवदर्भसमन्वितं। गृहीत्वोदङ्मुखः कुर्यात्संकल्पं देवसंनिधौ। अथ कालातिक्रमे प्रायश्चित्तप्रयोगः। तत्रायु कुर्वन्पूर्वं न १

स्नानात्

घादितीरे प्रायश्चित्तांगं वपनं करिष्ये इति संकल्प्य सांगं वपनं कृत्वा तीर्थस्नानादिना सपत्नीकस्यात्मशुद्धिकरणं। ततः
शुचिः सभार्यः शुचौ देशे प्राङ्मुखो बद्धांजलिः सपवित्रकरो उपविश्य प्राणायामत्रयं कृत्वा। देशकालौ संकीर्त्य मम अग्न्यावसथ्या
धानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयार्थं प्रतिवर्षं एतावंति प्राजापत्यव्रतान्यहं चरिष्ये इति न्यं
संकल्प्य। प्राजापत्यानि कुर्यात्। तदशक्तौ प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां श्रद्धेत्याद्युक्त्वा अमुकप्रव
रान्विताऽमुकगोत्राऽमुकशर्माहं अमुकप्रवरान्विताऽमुकगोत्रायाऽमुकवेदांतर्गताऽमुकशाखाध्यायिनेऽमुकशर्मणे तुभ्यमहं इमांगां
संप्रददे। इत्युक्त्वा यवदर्भसहितं जलं ब्राह्मणहस्ते दद्यात्। एवमन्येष्वपि वाक्यमूहनीयं। तदशक्तौ अग्न्यावसथ्याधानमु
ख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यं गवां मूल्यमिदमेता
वन्मूल्यं ब्राह्मणेभ्यो अहं संप्रददे न मम। तद्वत् प्रत्याम्नायत्वेन प्रतिप्राजापत्यं द्वादश द्वादश द्वादश ब्राह्मणान् अहं भोजयि गाव्या व्याह
ष्ये। यद्वा तत्प्रत्याम्नायत्वेन गायत्र्या एतावंत्ययुतानि जपिष्यामि। तद्वत् एतावंति तिलाज्याहुतिसहस्राणि होष्यामीति संक तासिबी
ल्पितानि कुर्यात्। यद्वा निर्दिष्टनद्यादितीर्थयात्रादिना कुर्यात्। एवं प्रायश्चित्ते कृते होमद्रव्यं दद्यात्। तत्रायं क्रमः। प्राणानायम

रुद्रएकादशानिरूप द्वादशस्नानी

म्पदेशकालौ संकीर्त्य॥ अस्मिन्पुण्याहे आवसथ्याधानमुख्यकालातिक्रांतेतावद्दिनसंबंधिसायंप्रातर्होमद्रव्यदानमहं क
२ रिष्ये इति संकल्प्य। ततः ब्राह्मणान्गंधादिभिः संपूज्य पूर्ववत्॥ अमुकगोत्रायामुकवेदशाखाध्यायिने अमुकशर्मणे अ
मुकगोत्रो यजमानोहं अमुकशर्माहं आवसथ्याधानमुख्यकालातिक्रांतेतावद्दिनसंबंधिसायंप्रातर्होमद्रव्यं एतावत्प
2 रिमाणं दधितंडुलयवानामन्यतमं तन्मूल्यं द्रव्यं द्रवातुभ्यमहं संप्रददे न मम। एवमुक्तकालातिक्रमाभावे मुहूर्ते स ।सु
घ एव कुर्यात्। इतरपक्षादिकर्मणां द्रव्यस्य दानं न स्यात्॥ ततः शुभदिने चंद्रताराद्यनुकूले कृतप्रायश्चित्तः पूर्वेद्युर्वै
श्यस्य गृहात् अंबरीषगृहात् वा कुर्याजिनो ब्राह्मणगृहाद्वा अग्निमानीय आवसथ्याधानं कुर्यात्। तत्रायं क्रमः। अ
य शुभदिने प्रातः स्नात्वा ततः शुचौ देशे स्वगृहस्याग्नेयकोणे सार्धत्रयोदशांगुलया रज्ज्वा मंडलं परिलिख्य। तत्र द्वादशां
गुलोच्चां। चतुरंगुलविस्तृतां मेखलां कृत्वा। तत्र पंचभूसंस्कारान्कृत्वा। तत्कुंडं वस्त्रेणाच्छाद्य आवसथ्यमाणप्रयोगेण
संकल्पं कृत्वा गणेशपूजनमातृकापूजनादि कृत्वा यजमानः सपत्नीको हस्तधारितां सुमदं सएम्पीस्थालीमादा राम
य ब्राह्मणैः परिवृतो वेदघोषमंगलगीतवाद्यादिभिः। जनितोत्साहो वैश्यादिगृहात् अग्नीं स्थाल्यां गृहमागत्य पूर्वस २

गृहीत्वा१

स्कृतदेशात् पश्चिमतासने प्राङ्मुखः उपविश्य। आच्छादनं दूरीकृत्य आत्मानमभिमुखं अग्निं निदध्यात्। तत्रैव समाणाप्र
पा२ योगे तत्र होमादिकं कुर्यात्। इति आहरणोपक्रमः॥ अथ आरणेयपक्रमे आवसथ्याधानविधिः॥ तत्र वक्ष्यमाणे आ
वसथ्याधानादिसर्वकर्मसु ऋत्विगंतराननिधाना यजमानस्यैव कर्तृत्वात्। तत्रायं क्रमः। ततः कर्ता शुभदिने चंद्रानुकू
ले कृतप्रायश्चित्तः उक्तलक्षणमरण्यादिकं संपाद्य स्नातः शुचिः अहते वाससी परिधाय पवित्रपाणिः राचांतः संभृत
संभारः सोत्साहः सभार्यः कृतनित्यक्रियः शुचौ देशे प्राङ्मुखो नतजानुः श्रीपर्णीघासने उपविश्य। पत्नीः स्वदक्षि
णतो उपवेश्य। इष्टकुलदेवादीन्नत्वा आवसथ्याधानं कुर्यात्। तत्रायं क्रमः। तीक्ष्णदंष्ट्र०। सुमुखश्च० सर्वेषु कालेषु०
यत्र योगेश्वरः०। अनन्याः स्मृते सकलकल्याण०। सर्वेष्वारंभः। सर्वदा सर्वकार्येषु०। तदेव लग्नं०। सर्वमंगलकार्येषु०। त
देव लग्नं०। सर्वमंगल०। इत्यादि पठित्वा लक्ष्मीनारायणं मनसा ध्यात्वा। ॐ गणपतये नमः। ॐ दुर्गायै। ॐ क्षेत्रपाला
य। ॐ वास्तुपुरुषाय। ॐ मातृभ्यो। ॐ पितृभ्यो। ॐ आचार्येभ्यो०। ॐ इष्टदेवताभ्यो। ॐ कुलदेवताभ्यो०। ॐ ग्रा
मदेवताभ्यो ॐ सर्वेभ्यो देवेभ्यो। ॐ सर्वेभ्यो भूतेभ्यो०। सर्वेभ्यो ब्राह्मणेभ्यो नमः। इति सर्वान्प्रत्येकं नमस्कृत्य ततः

३ कर्त्ता प्राणानायम्य देशकालौ संकीर्त्य। अस्मिन्पुण्याहे श्रीपरमेश्वरप्रीत्यर्थं नित्यनैमित्यककाम्यकर्मानुष्ठानसाध
नमावसथ्याधानं अमुकशर्मा सपत्नीकोहं करिष्ये। इति देवसन्निधौ ताम्रपात्रं तोयपूर्णं यवदर्भसमन्वितं गृहीत्वो
3 दङ्मुखः संकल्पं कुर्यात्॥ ततः अघेत्याद्युक्त्वा तस्य निर्विघ्नतापरिसमाप्त्यर्थं गणपतिपूजनमहं करिष्ये। इति सं
कल्प्य। रक्ता॰क्षतादिभिः कृतेष्टदले पीठे पद्मे वा गणेशप्रतिमां गृहीत्वा स्थापयेत्। तद्यथा। गणानां त्वेति मंत्रस्य। गृत्स
मद ऋषिः। जगती छंदः। गणपतिर्देवता। गणेशस्थापने वि०। ॐ गणानां त्वा०। सिंदूराभं०। इत्यादिमंत्रैः सांगं गणेशं
संपूज्य पुण्याहवाचनं कुर्यात्॥ तत्रायं क्रमः। तत्र कर्त्ता प्राणानायम्य देशकालौ संकीर्त्य अस्मिन्पुण्याहे आवसथ्याधा
ननिमित्तं पुण्याहवाचनं करिष्ये। इति संकल्प्य। कलशस्थापनपूर्वकं पुण्याहवाचनं कुर्यात्। ततः कर्त्ता प्राणानाय
म्य देशकालौ संकीर्त्य आवसथ्याधाननिमित्तं मातृकापूजनमहं करिष्ये। इति संकल्प्य गौर्यादिमातृकापूजनं सप्त
पंच वा कुड्यलग्ना वसोर्धारां च वसोः पवित्रमसीति मंत्रेण कुर्यात्। ततः नांदीश्राद्धं। तत्रायं क्रमः। तत्र कर्त्ता प्राणाना एम
यम्य। देशकालौ संकीर्त्य आवसथ्याधाननिमित्तं सत्यवसुसंज्ञिकानां मातृपितामहिप्रपितामहीः पितृपितामहप्र ३

पितामहान्।मातामहमातुःपितामहमातुःप्रपितामहान्सपत्नीकान्नांदीमुखानुद्दिश्य संकल्पविधिना नांदीश्राद्धमहं करिष्ये इति संकल्प्य।ब्राह्मणेषु कुशादिषु वा कुर्यात्।ततः कर्ता प्राणानायम्य देशकालौ संकीर्त्य अस्मिन्पुण्याहे आवसथ्याधाननिमित्तं ब्रह्मवरणं करिष्ये इति संकल्प्य।ततः उदङ्मुखो यजमानः प्राङ्मुखोपविष्टं स्वशाखाध्यायिनं कर्मसु तत्त्वज्ञं ब्राह्मणं गंधादिभिः संपूज्य।अर्घेत्या पुष्पेः।अमुकप्रवरान्वितमुकगोत्रं अमुकवेदांतर्गतअमुकशाखाध्यायिनं अमुकशर्माणं ब्राह्मणं।अमुकप्रवरान्वितमुकगोत्रः अमुकशर्माहं मम आवसथ्याधान कर्मणि अनेन वस्त्रकुंडलादिना कृताकृतावेक्षकत्वेन ब्रह्माणं त्वामहं वृणे।वृतोस्मीति तेन वाच्यं।ततः यथाचतुर्मुखो ब्रह्मा०॥ ॥ततः अत्र केचित् ब्रह्माणं मधुपर्केनार्चयंति।सा तिल्का विशेषात्।ततः पूर्वोक्तकुंडे केचित् पंचभूसंस्कारान् कृत्वा मंथनं कुर्वंति तदुक्तं सार्धत्रयोदशांगुलामेकतः पाशसंयुतां।कृत्वा रज्जुं यदागारं मध्ये शंकुं त्रिहस्तचापाशं तत्र प्रमुच्यां तं धत्वा वमामपेन्नतः ये पंचसंस्काराः ततो संथनमाचरेत्।इति॥ अत्र च श्रौताधाने पंचभूसंस्कारानंतरं मंथनं कुशापामुपशमप्यस्थानासु छिद्रखेतदुत्यादिना तत्र पूर्वमेव संस्कारविधानात्।आवसथ्येह जातस्य लक्षणं कृत्वा तत्र श्रेणी
× यथा मंडलेरेखास्यात् त्रितिस्याद्वादशोछ्रीता॥ मेरवला त्रयसंयुक्ता तथा त्र्यंगुलविस्तृता।त०म०२

यससमिध्यचेति परिशिष्टवचनात अग्निमथनानंतरमेव भूसंस्कारादि इति केचित। वासुदेवादयस्तु परिसमूहना
४ दि कृत्वा निर्मथ्य स्थापनमित्याहुः॥ अथारणीग्रहणमाह। ततः कर्त्ता कुंडसमीपे शालायां यजमानः प्राङ्मुखो
पविश्य तस्य दक्षिणतः पत्नीउपवेश्य। अथोत्तरामुखो ब्रह्मा चतुर्विंशत्यंगुला दीर्घा। विस्तारे षडंगुला। उच्छ्र चतुरंगु
ला। एवमेवोत्तरारणिः इत्युक्तलक्षणमरणिद्वयं ब्रह्मा आदाय। अधरारणिं पत्न्यै। उत्तरारणिं यजमानाय दद्या
त। ततस्तौ च आवसथ्याग्निसाधनभूते इमे अरणी आवाभ्यां परिगृहीते। तत्रेयमधरा। इयमुत्तरा। इत्युक्त्वा मर्हस्तेना
रणिद्वयं स्पृशतः। इदं चात्रं इयमोविली। इदं नेत्रं इमानि स्रुवादीनि पत्राणि आवाभ्यां परिगृहीतानि इति परि
गृह्णीतः। ततः यजमानेन अधरारणेरेव मूलादारभ्य दक्षिणसव्यह[redacted]स्तांगुष्ठपर्वणा प्राक्संस्थं स्व
रूपं ध्येयं। तद्यथा। तत्र उत्ताना प्राक्शिरा अधरारणिः। तत्र मूलसमीपेमदंगुलमेकं तत्पादौ। तदूर्ध्वमंगुलत्रयं जं
घे। तदूर्ध्वमंगुलचतुष्टयमूरू। तदुपरि अंगुलद्वये देवयोनिः। तदुपरि अंगुलद्वयं वस्ती। तदूर्ध्वमंगुलमेकं कटिः। त राम
दूर्ध्वमंगुलत्रयमुदरं। तदूर्ध्वमंगुष्ठमेकं हृदयं। तदूर्ध्वमंगुलद्वयं वक्षः। तदूर्ध्वमंगुलमेकं ग्रीवा। तदूर्ध्वमंगुलमे ४

मरणीमुखं । तदूर्ध्वमंगुष्ठमेकं कर्णौ । तदूर्ध्वमंगुलमेकं नेत्रे । तदूर्ध्वमंगुलमेकं शिरः । एवमुत्तरारण्योः स्वरूपं ज्ञेयं । ततः
कर्त्ता गंधपुष्पवस्त्रधूपदीपनैवेद्यादिभिः अरणीपात्रादीनि च संपूज्य नमस्कुर्यात् । ततः कर्त्ता कुंडे प्राङ्मुख उपविश्य
श्च घेत्वा घृत्वा आवसथ्याधानांगभूतं पंचपदार्थादिकं करिष्ये कुशैस्त्रिः प्रदक्षिणं परिसमुह्य । गोमयोदकेन त्रिरुपलिप्य
स्फ्येन स्रुवमूलेन वा प्रागग्रा त्रिस्रो रेखा उल्लिख्य । अंगुष्ठानामिकाभ्यां रेखाभ्यः प्राचपार्थःस्तुधृत्य समुक्षिकरणहस्ते
न त्रिरभ्युक्ष्य । इति पंचभूसंस्कारान् कृत्वा तत्कुंडं वस्त्रेण छाद्य मंथनमारभेत् । अथ मंथनप्रकारः । ततः कुंड पश्चिमे
प्राग्ग्रीवमुत्तरलोमं कृष्णाजिनमास्तीर्य । तत्रोदगग्रां प्रागग्रां वा अधरारणिं निधाय । तत्पूर्वतः उत्तरारणिं निधाय ।
तत्र उत्तरारण्याः मूलभागे अष्टांगुलं प्रथमं छित्त्वा सीचात्राधोभागगर्ते प्रवेशयेत् । ततः अधरारण्यां उत्तरारुणमंथ
न प्रदेशे उत्तरारणेः प्रथमं मूलं निधाय चात्राग्रे वो विलिचात्रं नेत्रेण त्रिर्वेष्टयित्वा प्राङ्मुखेन यजमानेन गाढं धृत्वा ।
पश्चिमाभिमुखो पविष्टा पत्नी नेत्रं धृत्वा अग्न्युत्पत्तिपर्यंतं मथ्नाति । पत्न्या कुर्यात्समर्थे यजमानः । पत्नीयजमान
योरसामर्थ्ये अन्येऽपि च यो ब्राह्मणा मथ्नाति । ततमंथनकाले कर्त्ता । त्वदर्थमयमारंभः कृतस्त्वमेनं नमोऽस्तु ते । इति पठेत् । ततः

५ अन्ये ब्राह्मणाः। ॐ समास्त्वाः। ऊर्ध्वा अस्य०। ॐ अस्याजरासः। ॐ अग्ने तव श्रवः पावकवर्चाः। ॐ जनस्य गोपा० इत्यादीन्
पठंति। ततः जातमग्निमन्येषु पात्रेषु छगोमयचूर्णोपरि निहिततूलेन सपुरीषं प्रक्षिप्य। संधुक्ष्य प्रज्वाल्य पूर्वसंस्कृतं
कुंडात् पश्चिमतः प्राङ्मुखेउ विश्य आच्छादनं दूरीकृत्य आत्मानमभिमुखं अग्निं स्थापयेत्। ततः देवताभिध्यानं पद्धत्या। आ
वसथ्याधानकर्मणा हं पक्ष्ये। तत्र प्रजापतिमिंद्रमग्निं सोममग्नीवरुणा वग्नीवरुणौ वरुणं वरुणं सवितारं विष्णुं विश्वा
न्देवान् मरुतः स्वर्कान्। अग्निं वरुणं जातवेदसौ एताः आज्येन अग्निं पवमानं अग्निं पावकं अग्निं शुचिं अदितिं च चरुणा
अग्नीवरुणं उ सवितारं विष्णुं विश्वान्देवान् मरुतः स्वर्कान्। अग्निं वरुणं अदितिं जातवेदसं एताः पुनः आज्येन। चरुशे
षेण अग्निं स्विष्टकृतं देवा गातुविदः आज्येन अग्निं वायुं इत्यादि देवताः आज्येनाहं पक्ष्ये। ततः कर्ता अस्मिन्नावसथ्या
धानकर्मणि यावंतो वैकल्पिकाः पदार्थाः तानहं करिष्ये। इति हस्तौ संपुटीकृत्य ब्रह्माणं पश्यन् ब्रूयादिति केचित्॥ अथा
ग्निस्थापनानंतरं। दक्षिणतो ब्रह्मासनमास्तीर्य। उत्तरतः ब्रह्माणमुपवेश्य। अस्मिन् हवनकर्मणि त्वं ब्रह्मा भव। भवामी एम
ति ब्रह्मा वदेत्। ब्रह्माग्नेः पूर्वेण गत्वा स्वस्थाने उपविशेत्। ततः अग्रे उत्तरतः कुशेषु प्रणीताप्रणयनं। अग्नेः परिस्तरणं ५

उत्तरतः पात्रासादनं। पवित्रच्छेदनास्त्रयो दर्भाः पवित्रे द्वे प्रोक्षणीपात्रं। आज्यस्थाली। चरुस्थाली। संमार्जनकुशाः पंच दर्भाः
। उपयमनकुशाः सप्त दर्भाः। तिलाः समिधः स्रुवः। आज्यं। तंडुलाः। पूर्णपात्रं। ततः पवित्रे कृत्वा द्वयोरुपरि त्रीन् निधा
य। द्वौ मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य। सर्वाग्रेषु यथा अंगुष्ठांगुलिपर्वं छित्वा तानुत्तरतः क्षिपेत्। द्वे पवित्रे प्रोक्षणी
पात्रे निधाय। प्रणीतोदकमादाय। अंगुष्ठानामिकाभ्यामुत्पूय। सव्ये पाणौ कृत्वा। उत्तानांगुलिभिरपामुदिंगनं। ताभिः
स्तासां प्रोक्षणं। आज्यस्थालीं प्रोक्षामि। चरुस्थालीं प्रोक्षामि। एवमासादितपात्राणां नामग्रहणपूर्वकं प्रोक्षणं
असंचरे प्रोक्षणीनिधानं। आज्यस्थाल्यामाज्यनिरूप्य। चरुस्थाल्यां तंडुलोप्य। त्रिः प्रक्षाल्य। प्रणीतोदकमासि
च्य। आज्यं ब्रह्माधिश्रयति। तदुत्तरतः चरुं कर्ताधिश्रयति। उल्मुकेनोभयोः पर्यग्निकरणं। अर्धश्रिते चरौ स्रुवं प्र
तप्य। संमार्जनकुशाग्रैरंतरतः प्राक्संमृज्य। विपर्यस्य बहिर्मूलैः संमृज्याभ्युक्ष्य। पुनः प्रतप्य। अग्नेः पश्चात् निदध्या
त्। चरोः पूर्वेणाज्यमानीय स्रुवोत्तरतः सादयेत्। चरुमुद्वास्याज्यस्य पश्चिमत आनीय आज्योत्तरतः सादयेत्
पवित्राभ्यामाज्यमुत्पूय। अवेक्ष्य। प्रोक्षणीश्च पूर्ववदुत्पूय। उपयमनान् कुशानादाय। तिष्ठन् समिधोऽभ्यादाय।

प्रोक्षणीजलैः पर्युक्ष्य। पवित्रे प्रणीतासु निक्षिप्य। प्रोक्षणीपात्रं संस्रवप्रक्षेपार्थं स्थापयेत् दक्षिणं जान्वाच्य। दक्षिण
६ हस्तं निधाय। वाग्यतो जुहुयात्। ब्रह्मणान्वारब्धः स्रुवेणाज्यमादाय अग्नेरुत्तरभागे पूर्वाघारं प्रांचं ऋजुं दीर्घं। संत
तं। तद्दक्षिणभागे उत्तराघारं। ततः अग्नेरुत्तरं पूर्वार्धे आग्नेयमाज्यभागं। तथैवाग्नेर्दक्षिणपूर्वार्धे सौम्यमाज्यभागं।
तत्रायं क्रमः। मनसा। ॐ प्रजापतये स्वाहा। प्रजापतये इदं न मम। प्रोक्षणीपात्रे संस्रवः प्रक्षेपः सर्वत्र। ॐ इंद्राय
स्वाहा। इंद्राय इदं०। ॐ अग्नये स्वाहा। ॐ अस्य क्षेजुहुयात्। तद्यथा। त्वन्नः सत्वंन इति मंत्रद्वयस्य। वामदेव ऋषिः। त्रि
ष्टुप्छंदः। अग्निवरुणौ देवता। आधानांगहोमे विनियोगः। ॐ त्वन्नो अग्ने०। अग्नीवरुणाभ्यामिदं न मम। ॐ सत्व
न्नो अग्ने०। अग्नीवरुणाभ्यामिदं०।२। इमं मे वरुण तत्वायामीति मंत्रद्वयस्य शुनःशेप ऋषिः। गायत्री त्रिष्टुभौ छं
दसी। वरुणो देवता। आधानांगहोमे वि०। ॐ इमं मे वरुण०। वरुणाय इदं०।३। ॐ तत्वा यामि०। वरुणाय इदं०।४।
ये ते शतमिति मंत्रस्य शुनःशेप ऋषिः। जगती छंदः। वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः। आधानां एम
गहोमे वि०। ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरु ६

ततः स्वर्का स्वाहा। वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च इदं ।५। अयाश्चाग्न इति मंत्रस्य प्रजाप
तिऋषिः। विराट् छंदः। अग्निर्देवता। आधानांगहोमे वि०। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाअसि। अ
यानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा। अयसे अग्नये इदं ।६। उदुत्तममिति मंत्रस्य। शुनःशेपऋषिः त्रिष्टुप् छं
दः। वरुणो देवता। आधानांगहोमे वि०। ॐ उदुत्तमं०। वरुणाय आदित्याय अदितये च इदं ।७। भवतंन इति मंत्रस्य
प्रजापतिऋषिः। पंक्तिश्छंदः। जातवेदाग्नी देवता। आधानांगहोमे वि० ॐ भवतंनः। जातवेदोभ्यामिदं ।८। ततः स्था
लीपाकमभिघार्य स्रुवेणावदाय ब्रह्मणान्वारब्धो जुहुयात्। ॐ अग्नये पवमानाय स्वाहा। अग्नये पवमानाय इदं। ॐ
अग्नये पावकाय स्वाहा। अग्नये पावकाय इदं। ॐ अग्नये शुचये स्वाहा। अग्नये शुचये इदं। ॐ अदित्यै स्वाहा। अदित्यै इदं
९। ततः स्रुवं प्रक्षाल्य घृतमादाय ब्रह्मणास्पृष्टपूर्ववद्दर्भिः होमं कुर्यात्। तद्यथा। ॐ त्वन्नो अग्ने० सत्वं०।२। इमं मे०।३
तत्त्वा०।४। ये ते शतं०।५। अयाश्चाग्ने०।६। उदुत्तमं०।७। भवतंन०।८। ततः ब्रह्मणान्वारब्धः स्रुवेणोत्तरार्धात् चरुं अवदाय। ॐ
अग्नये स्विष्टकृते स्वाहा। अग्नये स्विष्टकृते इदं। ततः ब्रह्मणान्वारब्धः आज्येन जुहुयात्। अयाश्चाग्नेरिति मंत्रस्य

८ गौतमऋषिः। गायत्रीछंदः। देवागातुविदो देवताः। आधानांगहोमे वि०। ॐ अयाश्चाग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं
देवागातुविदः स्वाहा। देवेभ्यो गातुविद्भ्यः इदं०। ततः ब्रह्मणान्वारब्ध आज्येन जुहुयात्। यथा। ॐ भूर्भुवः स्वरितिम
हाव्याहृतीनां। प्रजापतिऋषिः। क्रमेण गायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निवायुसूर्या देवताः। आवसथ्याधानांग
होमे वि०। ॐ भूः स्वाहा। अग्नय इदं०। भुवः स्वाहा। वायव इदं०। स्वः स्वाहा। सूर्याय इदं। ततः त्वन्नो अग्ने इति मंत्रस्य।
वामदेवऋषिः। त्रिष्टुप्छंदः। अग्निवरुणौ देवता। प्रायश्चित्तहोमे वि०। ॐ त्वन्नो अग्ने०। अग्नीवरुणाभ्यामिदं न०। १ स
त्वन्नो अग्ने इति वामदेवऋषिः। त्रिष्टुप्छंदः। अग्नीवरुणौ देवता। प्रायश्चित्तहोमे वि०। सत्वं०। अग्नीवरुणाभ्यामिदं
अयाश्चाग्ने इति मंत्रस्य। प्रजापतिऋषिः। विराट्छंदः। अग्निर्देवता। प्रायश्चित्तहोमे वि०। ॐ अयाश्चाग्ने०। अयसे अ
ग्नय इदं०। ये ते शतमिति शुनःशेपऋषिः। जगतीछंदः। वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता। प्रायश्चि
त्तहोमे वि०। ॐ ये ते शतं०। वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च इदं। उदुत्तममिति मंत्रस्य शु शुन
नःशेपऋषिः। त्रिष्टुप्छंदः। वरुणो देवता। प्रायश्चित्तहोमे०। ॐ उदुत्तमं०। वरुणायादित्यायादितये च इदं०। ॐ प्र ८

जापतये स्वाहा। प्रजापतये इदं०॥ ततः अग्नेः परिस्तरणं स्रुवस्य बर्हिषो होमस्रुक्षमीं संस्रवप्राशनं॥ पवित्राभ्यां मार्जनं॥ अ
ग्नौ पवित्रप्रतिपत्तिः। ब्रह्मणो वरदानं। प्रणीताविमोकः शांतिवचनं॥ ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते
कृण्वंतु भेषजं॥ अग्नेरलंकरणं॥ गंधपुष्पादिना। पूर्वादिक्रमेण। ॐ अग्नये नमः। हुतवाहनाय०। हुताशने०। कृष्ण
वर्त्मने नम०। चत्वारि देवमुखाय नमः। सप्तजिह्वाय नमः। वैश्वानराय नमः। जातवेदसे नमः। मध्ये श्रीयज्ञपुरुषाय न
मः। चत्वारि शृंगा० नैवेद्यं फलतांबूलं। दक्षिणां॥ ॐ अग्नेन यज्ञेन यज्ञं। पुष्पांजलिदानं। ततः प्रार्थना॥ ॐ नमो ब्र
ह्मणो इति त्रिः। नमस्ते अस्तु भगवः। सहस्रेन नमः। द्विहस्तेन नमः। चतुर्हस्तेन नमः। पंचहस्तेन नमः। दशहस्तेन नमः। शत
हस्तेन नमः। असहस्रहस्तेन नमः। नमस्ते अस्तु मा मा हिं० सीः नमस्ते गार्हपत्याय नमस्ते आह०। नमः सप्ताव
स०। चर्भिश्च चतुर्भिश्च। तस्मै यज्ञात्मने नमः। येनाक्रांतास्त्रयो लोका दानवाश्च वशीकृताः। शरणं सर्वभूतानां
तस्मै यज्ञात्मने नमः। शमीगर्भस्य योगर्भस्तस्य गर्भस्य यो रिपुः रिपुगर्भस्य योगर्भस्तस्मै यज्ञा०। प्रमादात्कुर्वतां
कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः। मंत्रतस्तंत्रतः छिद्रं देशकालार्हवस्तुतः

सर्वं करोति निःच्छिद्रं नामसंकीर्त्तनं हरेः। ॐ यन्नेवर्द्धेः शिवरूपं ये च ते सर्वे हेतवः। तैः पाहि नः। स्ततो देव पिता पुत्रमि
८ वात्मजो ततः। त्वमग्ने इत्यस्य आदिमऋषिः जगतीछंदः। अग्निर्देवता। अग्निस्तुतौ वि०। ॐ त्वमग्ने प्रथमो अंगिरा०
। ततः अस्याजरास इति सप्तदर्शर्चस्य॥ तत्र प्रथमायाः ब्रह्मऋषिः गायत्रीछंदः। अग्निर्देवता। द्वितीयतृतीयचतुर्थ
नवमदशमा गायत्र्यः। चतुर्दशतमानुष्टुप्। पंचदशतमा बृहती शेषास्त्रिष्टुप्॥ अग्निस्तुतौ वि० ॐ अस्याजरासः
8 १०। ततः कश्यपस्येति विभूतिधारणं। गोत्रोच्चारणं। नमस्कारः। ततः आगतायमम्देशकालौ संकीर्त्य कृतैतदा
वसथ्याधानकर्मणः सांगतासिद्ध्यर्थं प्रजापतिदेवान् त्रयस्त्रिंशत् ब्राह्मणान् भोजयिष्ये इति संकल्प्य भोजये
त्। ततः यस्य स्मृत्या चेति। यांतु मातृगणाः। उत्तिष्ठ ब्रह्मणस्पते०। इति मातृकाविसर्जनं। ततः ब्राह्मणपूजा। आशी
र्ग्रहणं॥ इत्यावसथ्याधानप्रयोगः। अत्रार्थे किंचित् निर्णयः। आधानमध्ये यदि विलिष्टमापतति तदा मातृपूज एम
नं श्राद्धं विना सकलमाधानमावर्त्तते ब्राह्मणभोजनात्प्राक् संकल्पादुपरि यदि विपत्नी रजस्वला जायते अथवा ८
सूतकं मृतकं वा तदा मातृपूजनादि सर्वमाधानमावर्त्तते। आधानात्प्राक् नंतरं मणिकाधानात् प्राक् यदि पत्नी

रजस्वलासूतकंमृतकंवा जायते तदाशुचित्वे जाते तदा मणिकाधानानंतरं मणिकाधानात् प्राक् यदि च महायज्ञाः
सायंप्रातर्होमारंभश्च कार्यः। केचिदेवं वदंति। अग्निस्थापनादुपरि यदि पत्नी रजस्वलासूतकंमृतकंवा तदाशुचि
त्वे अग्निधारणं कार्यं। शुचित्वसकमाधानसमाप्तिः। अथ मणिकाधानं। तत्प्रयमप्रयोगे। तत्राग्नेरेकदेशं महान
से नीत्वा तत्र स्थाल्यर्थं पाकं कृत्वा तमग्निं पुनः शालाग्नौ प्रक्षिप्य। ततः कर्त्ता शुचिः सभार्यः प्रांङ्मुख उपविश्य। प्रा
णानायम्य देशकालौ संकीर्त्य उदकार्थसिद्ध्यर्थं मणिकाधानं करिष्ये। इति संकल्प्य। ततः मणिकाधाननिमित्तं
मातृपूजनपूर्वकं नांदीश्राद्धं करिष्ये इति संकल्प्य। ततः मातृपूजनं नांदीश्राद्धं च कुर्यात्। ततः कुंडस्येशान्यां
प्रांङ्मुख उपविश्य। देवस्यत्वेति मंत्रस्य प्रजापतिऋषिः। गायत्री छंदः। अग्निर्देवता। अभ्रादाने वि०। ॐ देवस्य
त्वा० आददे नारिरसि। इत्यभ्रिमादाय। ततः इदमहं रक्षसामिति मंत्रस्य। प्रजापतिऋषितः यजुः। राक्षोघ्नं
देवतं भूपावरखनने वि०। ॐ इदमहं रक्षसो ग्रीवा अपि कृंतामि॥ अनेन भांडानुमानं परिलिख्य तत् स्थाने खननं
किंचित् कृत्वा। प्राग्यां दिशि यां सदुद्भूतस्य अप उपस्थ तस्मिन् प्रागग्रान् कुशानास्तीर्य। एवं हरिद्रा अरिष्टकसर्ष

पदधिबदरदूर्वादिमंगलद्रव्यं निक्षिप्य। ततः समुद्रोसीतिमंत्रस्य। सात्याऋषयः। यजुः। वायुर्देवता। मणिकावधानेवि०
९ ॐ समुद्रोसि नभस्वानार्द्रदानुः शंभुः। अनेन मणिकमवटे संस्थाप्य मयोभूरित्यनुवाकशेषस्यापि मंत्रविनियोगा
त्। ततः। आपो रेवतीरितिमंत्रस्य। परमेष्ठीऋषिः। त्रिष्टुप्छंदः। आपोदेवताः। उदकासेके वि०। ॐ आपो देवती
:क्षयथा हि वस्वः क्रतुं च भद्रं बिभृताममृतं च। रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धाः। इत्यनेन म
1 णिके अपआसिंचेत्। एवं आपो हिष्ठेति त्रिऋचां। सिंधुद्वीपऋषिः। गायत्रीछंदः। आपोदेवता। उदकासेके
वि०। ॐ आपो हि ष्ठा०।३ यो वः। तस्मा अरं०।३। एभिः अपआसिच्य। अस्यां गतेन एकं ब्राह्मणं भोजयिष्ये। इति
संकल्प्य। ब्राह्मणं भोजयेत्। ततः यां तु मातृगणा इति मातृविसर्जनं। यस्य स्मृत्या०। आवाहनं न जानामि०
इत्युक्त्वा क्षमाप्य। समापयेत्। आशीर्ग्रहणं॥ इति मणिकावधानं॥ एवं प्रत्यहं मणिकोदकं नि॥ सार्यप्रक्षाल्य
स्वयं पत्नी शिष्यो वा आपो रेवतीत्यादिपूर्वोक्तमंत्रैरपः आसिंचति। इत्याद्यकरणे दोषः। एकरात्रोषितो राम
दकस्य जेदापः समुद्यत इति। तथा नमूद्रेण हृतं तोयं मणिके प्रक्षिपेद्यतः। इति श्रीमद्गोविंदचरणद्वंद्वक ९

मलमधुव्रतकाण्वशाखिप्रतिष्ठानपुरवासिसिद्धमहात्मजश्रीनरसिंहभट्टविरचितायां संस्काररत्नावल्यां श्रावसन्ध्या-
धानप्रयोगः समाप्तः ॥ अथ वैश्वदेवविधिः। तत्र पारस्करः। अथातः पंचमहायज्ञा वैश्वदेवादन्नात् पर्युक्ष्य स्वाहा
कारैर्जुहुयादिति सूत्रं। महायज्ञा इति कर्मणो नामधेयं। तत्र यमः। ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च। भूतय
ज्ञो नृयज्ञश्च पंच यज्ञाः प्रकीर्त्तिताः। एषां लक्षणानि शौनकेन दर्शितानि। यत्स्वाध्यायमधीते सो ब्रह्मयज्ञ उदा
हृतः। तेष्वग्नौ हवनं यत्स्याद्देवयज्ञः स उच्यते। यत्पितृभ्यः प्रदानं हि पितृयज्ञ इतीष्यते। यद्बलेर्हरणं भूमौ भूतय
ज्ञः स उच्यते। मनुष्ययज्ञः संज्ञेयो यदत्रातिथिपूजनं। एतान्पंच महायज्ञान्कुर्यादहरहर्द्विजेति। चतुर्विंश
तिमते। प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनं। शेषं महानसे कृत्वा तत्र पाकं समाचरेत्। तमग्निं पुनरा
हृत्य शालाग्रावेव निक्षिपेत्। ततोऽग्नौ वैश्वदेवादि कर्म कुर्यादतंद्रितः। कात्यायनः। उद्धृत्य हविरासिच्याहवि
ष्येन घृतादिना। स्वशाखोक्तविधिना हुत्वा तच्छेषेण बलिं हरेत् इति। पराशरः। स्वगृह्योक्तविधानेन जुहुयाद्वै
श्वदेविकं। जुहुयात्सर्पिषाभ्यक्तं गव्येन पयसाथवा। व्यासः। वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं च यत्। संस्कृ

१० तान्नैर्हि विविधैः हविष्यजंनादिभिः। इति व्यासवचनेन स्वगृह्योक्तस्यैव तस्यैकेनुउचितत्वात् तथा स्वशाखाश्रयमुत्स
10 ज्य परशाखाश्रयं तु यः। कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य तत्कृतमिति। छंदोगपरिशिष्टविरोधाच्च। न च मणिकाधा
नात्वसूत्रोक्त एव निरग्निकेनापि कार्य इति सिद्धं॥ अथ संकल्पविधिः। तथा। कश्चित पंचसूनापनुत्यर्थं वैश्वदेवं
कुर्वंति। केचित्। आत्मसंस्कारार्थं कुर्वंति॥ आत्मसंस्कारे तौ वसर्वान्नादीनां संस्कारकत्वात् तदुक्तं॥ आत्मसंस्कार
एवापंनान्नसंस्कार एव स इति। इत्युक्तत्वात॥ अथ हविष्यव्यंजनादिभिरित्युक्तं। तथा वैदिके लौकिके वापि
हुतोच्छिष्टे जले क्षितौ। वैश्वदेवस्तु कर्त्तव्य पंचसूनापनुत्तये इति। अहरहस्वाहा कुर्यादाकाष्ठादिति पारस्करो
पि॥ अन्नाभावे केनचिदाकाष्ठादेवैभ्यो मनुष्येभ्य आदपात्रादिति। तथा। चतुर्विंशतिमते। अलाभे येन केना
पि फलशाकोदकादिभिः। पयोदधिघृतैः कुर्याद्वैश्वदेवं स्तु वेणतु। तथा। आभावादग्निहोत्रस्य आवसथ्यस्य वा
प्यतः। यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै। तत्राकृत्वा तु यो भुंक्ते सो भुंक्ते किल्बिषं नरः। प्रोषितोथात्मसंस्का एम
रं कुर्यादेवाविचारयन्। गृहे पुत्रादिना कर्त्तव्यमदृष्टार्थः। प्रवासेपि वैश्वदेवं कार्यो यदि गृहे कर्त्ता नास्ति। प्रवा १०

सेपिपक्वघभावेतंडुलादिनाकार्यात्तदुक्तंस्मृत्यर्थसारे।पक्वाभावेप्रवासेचतंडुलौनोषधिंस्तथा।पयोदधिघृतंवापिकंद
मूलफलादिना।योजयेद्वैश्वयज्ञादौजलंवापत्सुवाजलौ।इतितथास्मृत्यर्थसारे।ईदृनयः फलंमूलंतांबूलंपयत्री
षधं।भक्षयित्वापिकर्तव्यास्नानदानादिकीः क्रियाइति॥अथवैश्वदेवेहविष्यान्नादि।छंदोगपरिशिष्टे॥हविष्येषु
यवामुख्यास्तदनुव्रीहयोमताः।माषकोद्रवगौरादीन्सर्वाभावेपिवर्जयेत्।गौराःश्वेतसर्षपाः।आदिपदेनकोद्र
वचणकमसूरकुलत्थोद्दालवर्जंनिर्वपणीयमितिशंखोक्तानिसंगृह्यंते।तथा।अष्टेहामपिगोधूमाःशालयो
व्रीहयोयवाः।हविस्तृहविरभ्यक्तंनहविस्तृहविर्कृतं।तथाकात्यायनः।पयोदधिघृतैःकुर्यात्फलशाकोदका
दिभिः।अलाभेयेनकेनापिकाष्ठमूलतृणादिना।व्यासः।जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितं।दध्यक्तंपय
साक्तंपात्रतदलाभेंवुनापिवा।अन्नैःपर्युषितैःकुष्ठीअस्तुस्तेद्विषतांवशी।रुक्षैर्दरिद्रतांयातिक्षारंहुत्वाव्रजत्स
धः।तथा।कोद्रवंचणकंमाषंमसूरंचकुलत्थकं।क्षारंचलवणंचैववैश्वदेवेविवर्जयेदिति।स्कांदे।निःपावाकोद्र
वान्माषाचकलापांश्चणकांस्त्यजेत्।तैलपक्वंचपक्वान्नंसर्वंलवणंवत्यजेत्।आढकीश्चमसूरांश्चवर्तुलाव

रटांस्तथा। मुक्तशेषं पर्युषितं वैश्वदेवे विवर्जयेत्। तथा। क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत्। क्षारगणमाह। तिलमु
११ द्गादृते शैव्यं सस्ये गोधूमकोद्रवौ। चीनकं देवधान्यं च सर्वं शाकं तथैव च॥ स्विन्नं धान्यं तथौषध्यं मूलं क्षारगणः स्मृ
तः। इतोन्यदक्षारं ज्ञेयं। तथा। कात्यायनः। पाकाभावे प्रवासे च तंडुलानौषधीस्तथा। पयोदधिघृतं वापि कंद
मूलफलानि वा। योजयेद्देवयज्ञादौ जलं वाप्य स्रुक्सजलमिति। पाकाभावदत्तफललक्षणं। तथा च चतुर्विंशति
मते। अलाभे येन केनापि फलशाकोदकादिभिः। पयोदधिघृतैः कुर्याद्वैश्वदेवं स्रुवेण तु। हस्तेनान्नादिभिः कुर्याद
द्भिरंजलिना जलमिति। येन केनापि कारणेनेत्यर्थः। द्रव्यद्वयेण चेद्वैश्वदेवस्तथा स्रुवेण होतव्यमेव मुत्तरयोरपि। द्रवं
हविः स्रुवेणैव पाणिना कठिनं हविरिति स्मरणात्। पाणिनापि कथं होतव्यमित्युक्तं परिशिष्टे। शाकं वा यदि वा प
त्रं मूलं वा यदि वा फलं। संकल्पयेद्यदाहारस्तेनाग्नौ जुहुयादपीति। तथा ज्वत्राहोमपात्रमनादेशे द्रवद्रव्ये स्रुवं स्मृ
तः। पाणिरेवाद्रवद्रव्ये स्रुवा चात्र न हूयते। तथा। अंगुल्यग्रैर्न होतव्यं न कृत्वांगुलिभेदनं। अंगुल्युत्तरपार्श्वेन न हो राम
तव्यमिति स्मृतं। तथा। अग्निः प्रदक्षिणावर्त्तः कर्मकर्तुः शुभावह इति। अन्यच्च। यत्र दिग्नियमो नास्ति सर्वथा। त ११

थाऽथासीन ऊर्ध्वः प्रहोता नियमो यत्रेनेदृशः। तदासीनेन होतव्यं न प्रहूतेन न तिष्ठता। यत्रोपदिश्यते कर्म कर्तुरंगं न
चोच्यते। दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः। अथ अग्निपूजनादि। तथा। अथ समागमिष्यात्वा ततोऽग्नेः पूजनं बहिः परि
तो गंधपुष्पाद्यैः स्यान्मौनी पर्युक्षणं ततः। जान्वाच्य दक्षिणं सव्यं हृदये त्वकरं न्यसेत् इति। स च होमः स्वसमिद्ध ए
वाग्नौ कार्यः। तथा च कात्यायनः। योऽनर्चिषि जुहोत्यग्नौ व्यंगारे चैव मानवः। मंदाग्निरामयावी च दरिद्रश्चोपजायते
तस्मात्समिद्धे होतव्यं नासमिद्धे कथंचन। आरोग्यमिच्छतायुश्च श्रियमात्यंतिकीं तथा। जुहूयात्स्वं द्रुते चैव याति
शूर्पास्यदारुभिः। न कुर्यादग्निधमनं न कुर्याद्व्यजनादिना। मुखेनैव धमेदग्निं मुखेनेति च वो लौकिके योजयंति तदि
तिस्मरणात्। अथ बलिहरणं। कात्यायनः। स्वशाखाविधिना कृत्वा तच्छेषेण बलिं हरेदित्युक्तं। गोभिलोऽपि। स्वयं ने
वैतान्यावद्गृहे वसेद्बलीन् हरेदपि वान्योऽब्राह्मण इति। यावद्गृहे वसेत्तावत्स्वयमेव बलीन् हरेदशक्तौ अन्यो ब्रा
ह्मण इत्यर्थः। ब्राह्मणग्रहणं पुत्रादिप्रदर्शनार्थं। अत एवात्रिः। पुत्रो भ्राता तथा ऋत्विक् शिष्यः श्वशुर मातु
लः पत्नी श्रोत्रिय यस्यां स्युर्दृष्टास्ते बलिकर्मणीति। वसिष्ठोऽपि। पुत्रो भ्राता तथा पत्नी शिष्यो दासो बलिं हरेदि

दिति। मनुस्मरणात्। यदा तु गृहेभ्यः कर्ता नास्ति तदा प्रवासेति पित्र्यमेव कुर्यान्न दाह मनुः प्रवासं गच्छतो यस्य गृहे क
१२ र्ता न विद्यते। पंचानामहतामेषां स मज्जैः सह गच्छतीति। मार्कंडेयपुराणे। एवं गृहबलिं कृत्वा गृहे गृहपतिः शु
चिः। आप्यायनार्थं भूतानां कुर्यादुत्सर्गमादरादिति। उत्सर्गमन्त्रस्येतिशेषः। तदुक्तं विष्णुपुराणे। इत्युच्चार्य नरो द
12 द्यादन्नं श्रद्धासमन्वितः। भुवि भूतोपकाराय गृही सर्वाश्रयो यतं इति। इति पूर्वोक्तान्मंत्रान् ततः श्वादिभ्यो दद्या
दित्युक्तं तत्रैव। श्वचांडालविहंगानां भुवि दद्यान्ततो नरः। ये चान्ये पतिताः केचिदामपात्राः समागताः। मनुः। एव
यः सर्वभूतानां ब्राह्मणो नित्यमर्चति। स गच्छति परं स्थानं तेजोमूर्त्तिर्यथार्जुनेति॥ पितृयज्ञभूतयज्ञाहिकं
सूत्रोक्तं ज्ञातव्यं॥ छंदोगे। स्वधाकारेण निरयेत् पितृयं बलिमथः परं। तमध्ये केन नमस्कारैः कुर्वते नेति गो
तमः। एकं इति शाखांतरास्त्रिप्राये। कात्यायनः। श्राद्धं वा पितृयज्ञस्यात् पित्र्यो बलिरथापि वेति। श्राद्धमन्त्र नि
त्यश्राद्धं तन्तु निरग्निना कर्त्तव्यं न साग्निना कर्त्तव्यमिति केचित्। तदुक्तं कारिकायां। नित्यश्राद्धं निरग्नेः स्या राम
त्साग्नेः पित्र्यो बलिस्मृतः। कृतत्वात् पितृयज्ञस्य साग्नेः श्राद्धं न विद्यते। नित्यं पित्र्येण बलिना निरग्नेस्तत्तु विद्य १२

तेइति॥ अथ पंचयज्ञाकरणे प्रायश्चित्तं॥ बौधायनः॥ एतेभ्यः पंचयज्ञेभ्यो मध्ये कोपि तु हीयते। मनस्तव्याहृतिस्तत्र प्रा
यश्चित्तं विधीयते। आर्चं तत्र जपेन्मंत्रं दशवारं सदा बुधः॥ नित्यश्राद्धं यदा न्यूनं कुरुते वात्र संशय इति। एतेषां पंच
महायज्ञानां मुख्यकालाकरणे अस्तमयात्प्राक् कार्याः॥ प्रवासात् पंचानां लोपे पादकृच्छ्रः प्रायश्चित्तं॥ मत्या
लोपे कृच्छ्रः॥ पंचानां मध्ये द्वयोरेकस्य वा लोपे उपवासः॥ अनादिष्टं चाघृतदुक्तं। आहिताग्निरमत्या त्रिरात्रमैंदवं च
रेदिति केचित्॥ तथा॥ उपावासः त्रिरात्रं स्यादितस्य क्रमादिति। अनिर्वृत्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही। अनातु
रः सति धने कृच्छ्रार्द्धेन विशुध्यति। अकृत्वान्यतमं यज्ञं पंचानामविकारतः॥ उपवासेन शुद्धिः स्यादिति गृह्यप्रजा
पतिरिति॥ अथ अभुविकृतबलिदानविधिः॥ तत्र विष्णुः॥ भुविकृतबलिदानं भूतयज्ञाभिधानं शिखिनि परविप्रेऽ
प्सु वल्मीके गवीये। अजतरुर्वृषगेभ्यः स्थानमेतेषु दद्यादिति वदति मुनीशः शौनको भूतयज्ञं इति। अथ प्रसं
गात होत्रग्यंतरगमने प्रायश्चित्तं। द्वौ विप्रौ ब्राह्मणाग्नी वा दंपती गोद्विजोत्तमौ। अंतरेण यदा गच्छेत द्विजः सां
श्चाद्रायणं चरेत्। तथा होमकाले तथा दोहे स्वाध्याये दारसंग्रहे। अंतरेण यदा गच्छेद्द्विजश्चाद्रायणं चरेत्

अथ मनुष्ययज्ञः। निवीती भूत्वा सनकादिमनुष्येभ्यो हन्तेति कुशजलैर्मिश्रमन्नं ग्रासचतुष्टयपर्याप्तं दद्यात्। अ
१३ संभवे तदर्द्धं पादमेव वा। एष मनुष्ययज्ञ इत्येके। ततो गोदोहमात्रं वै कालं तिष्ठेत् गृहांगणे। अतिथिग्रहणार्था
यं तदूर्ध्वं वा यथेच्छयेति। अतिथिपूजनमेवेत्यपरे। तदुक्तं मुनिना। नृयज्ञोतिथिपूजनमिति। बौधायनोपि
। अहरहर्ब्राह्मणेभ्योन्नं दद्यान्मूलफलशाकानि वेत्यर्थेनं मनुष्ययज्ञं समाप्नोतीति। नारायणः। अशक्तस्त्व
न्नमुद्धृत्य हन्तेत्येवं प्रकल्पयेदिति। कूर्मपुराणे हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः। दद्यादतिथ
ये नित्यं बुध्येत परमेश्वरमिति। एतेषां लक्षणमाह मनुः। ग्राससमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं। अग्रं
चतुर्गुणीकृत्य हन्तकारो विधीयते। मार्कंडेये। भोजनं हन्तकारं वा मुखं भिक्षां तथापि वा। अदत्वा च न भोक्त
व्यं यथाविभवमात्मन इति। विष्णुपुराणे। दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणे। स्वेच्छया वा बुधो द
द्याद्विभवे सत्यवारितमिति। परिव्राट् संन्यासी। नृसिंहपुराणे। अकृते वैश्वदेवे तु भिक्षुके गृहमागते उ राम
द्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत्। अत्र कारणमाह पराशरः। वैश्वदेवकृतं पापं शक्तो भिक्षुर्व १३

श्रीगणेशाय नमः। अथावसथ्याधाने पूर्वोक्ताधानकालस्य दैववशादतिक्रमे प्रायश्चित्तं कुर्यात्। तत्र कात्यायनः। हुतदारो गृहे ज्येष्ठो यो
नादध्यादुपासनं। चान्द्रायणं चरेद्वर्षं प्रतिमासमथापि वा। तथा कालेनाधायकर्माणि कुर्याद्द्विप्रोष्यनापदि। तदकुर्वंस्त्रिरात्रेण
पाहितं। ननु भिक्षुहृतान्दोषान्वैश्वदेवेऽपोहति। वैश्वदेवकृत वैश्वदेवस्य पश्चात्करणं ज्ञनितं। भिक्षुहृतान्भिक्षु
वैमुख्यहृतान्। भिक्षुः कुक्षौ कोत्यासेन। यतिश्च ब्रह्मचारी च भिक्षार्थी गुरुपोषकः। अध्वगः क्षीणवृत्तिश्च षडेते भि
क्षुकास्स्मृता इति। पाद्मे। व्याधितस्यार्थहीनस्य कुटुंबात्प्रच्युतस्य च। अध्वानं वा प्रपन्नस्य भिक्षाचर्या विधीयते
भिक्षुकाभावे गोभ्यो दद्यात्। अग्नौ वा प्रक्षिपेत्। एवंमेव प्रतिपत्तिर्मनुष्ययज्ञस्य यतिदिक्षादाने विशेष उक्तः पराश
रेण। यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलं। तदन्नं मेरुणा तुल्यं तज्जलं सागरोपममिति। देवलः। सायंप्रातर्गृहद्वारं
भिक्षार्थं नावघट्टयेदिति। अत्रार्थशब्दो निवृत्तिपरः। तेन भिक्षुनिवृत्त्यद्दूरं न दद्यादित्यर्थः। सायमप्यतिथिरवश्यं
भोजनीयमित्याह मनुः। अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना। काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसे
त्। योगयाज्ञवल्क्यः। दिनेतिथौ तु विमुखे गते यत्पातकं भवेत्। तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखे गते। सूर्येऽस्तं

गतेप्राप्नोतिथिः सूर्योढः योगयाः। सत्कृत्य भिक्षवे भिक्षां दद्याद्ब्रह्मचारिणे। यत्पुण्यफलमाप्नोति गां दत्वा तु यथा
१५ विधि। तत्पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृही। पद्मपुराणे। यः पात्रपूरणीं भिक्षां मतिथिभ्यः प्रयच्छति। वि
14 मुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयादिति। हस्तेन भिक्षादाने दोषमाह यमः। हस्तदत्ता तु या भिक्षा सलिलं कं
जहूतं वैश्वदेवपवहिष्कृतं। अतिथिं तं विजानीयान्नैकग्रामनिवासिनं। तथा। नैकग्रामीणमतिथिं गृहीतं कदा
चन। अनित्यमागतो यस्मादतिथिरुच्यत इति। अतिथिपूजायां कारणमुक्तं विष्णुपुराणे। धाता प्रजापतिः श
क्रो वह्निर्वसुगणोऽर्यमा। प्रविश्यातिथिमेवैते भुंजते यन्नरेश्वर। तस्मादतिथिपूजायां यतेत सततं नरः। बृहस्प
तिः पितरः पारशौचेन भोजनेन प्रजापतिरिति। अतिथिपूजाकरणेऽशक्तावाप्युक्तं पराशरे। वैश्वदेवविहीना ये
आतिथ्येन बहिष्कृताः सर्वे ते नरकं यान्ति काकयोनिं व्रजन्ति च। विष्णुः। अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्त एम
ते। स तस्य दुष्कृतं दत्वा पुण्यमादाय गच्छति। विष्णुपुराणे। ततो गोदोहमात्रं तु तिष्ठेत्कालं गृहाङ्गणे। अतिथिग्र १५
हणार्थाय तदूर्द्ध्वं वा यथेच्छया। अतिथिवीक्षये विशेषमाह वैयाघ्रपद्यः। अचिंतितमनाहूतं वैश्वदेवे तु

परिस्थितं ॥ अतिथिं तं विजानीयान्नैकग्रामनिवासिनं । क्षुधार्त्तस्तृषितश्चैव श्रान्तो गृहमुपागतः । प्रयत्नेन तु संपूज्यः सोतिथि
ः स्वर्गसंक्रमः । दुष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा । संप्राप्तो वैश्वदेवांते सोतिथिः सर्गसंक्रमः ॥ गोत्रादिन प्रष्टव्यमि
त्याह यमः । न पृच्छेद्गोत्रचरणं देशं नाम गुणं श्रुतं । अध्वन्यमागतं विप्रं भोजनार्थमुपागतं । देशं नाम कुलं विद्यां पृ
ष्ट्वा योन्नं प्रयच्छति । न स तत्फलमाप्नोति दत्वा स्वर्गं न गच्छति । आसनपाद्यादिना परिचर्या उत्तमवर्णस्य सवर्णस्य
च कार्या । न तु हीनवर्णस्य । किंतु तस्मै अन्नदानमात्रं दद्यात् । तथा च मनुः । क्षत्रियवैश्यशूद्रादिभ्यो अभ्यागत
धर्मेण पूजयेद्भोजयेच्चापराशरः । पापी वा यदि चांडालो विप्रघ्नः पितृघातकः । वैश्वदेवे तु संप्राप्तः सोतिथिः स्व
र्गसंक्रमः । तथोतेनार्थे तन्त्रवाममित्याह स एव । देशं नाम कुलं विद्यामन्नार्थं यो निवेदयेत् । चैवस्वते घुधर्मेषु
वांताशी स निरुच्यत इति । देवलः । नाद्यतं भोजयेद्धु । ब्राह्मणं भोजयेन्मूर्खं नरके चिरमावसेदिति । इति
पंचयज्ञनिरूपणं ॥ श्रीकृष्णचरणद्वंद्वमाधाय हृदयांबुजे । सिद्धभद्रतनूजेन काशीपुरनिवासिना । रचितः
श्रीनृसिंहेन वैश्वदेवादिनिर्णयः । अथ पंचमहायज्ञाः । तत्रासंक्रमः । तन्त्रप्रयोगे । कुंडात् अग्नेरेकदेशं महा

नमेनीत्वा तत्र पाकं हुत्वा तमग्निं कुंडे पुनर्निक्षिप्य । ततः ब्राह्मणानामग्रे देशकालौ संकीर्त्य आत्मसंस्कारद्वारेण श्रीपर
१५ मेश्वरप्रीत्यर्थं देवयज्ञभूतयज्ञपितृयज्ञमनुष्ययज्ञानहं करिष्ये । इति संकल्प्य । ततः पंचमहायज्ञनिमित्तं मातृपूज
नपूर्वकं नांदीश्राद्धं च करिष्ये । इति संकल्प्य मातृपूजनपूर्वकं नांदीश्राद्धं कुर्यात् ॥ अथ देवताभिधानं निर्मूलं
15 देशाचारमात्रं कृताकृतं । तद्यथा । ब्रह्माणं । प्रजापतिं । गृह्यं । कश्यपं । अनुमतिं । पर्जन्यं । अपः । पृथिवीं । धातारं
विधातारं । वायुं । प्राचीं दिशं । दक्षिणां दिशं । उदीचीं दिशं । प्रतीचीं दिशं । ब्रह्माणं । अंतरिक्षं । विश्वान् देवान् । वि
श्वानि भूतानि उषसं । भूतानां पतिं । पितृन् । यक्ष्माणं । अहं यक्ष्ये ॥ ततः गंधादिनाग्नेः पूर्वादिक्रमेण पूजयेत् । ॐ
अग्नयेनमः । हुतवाहनाय नमः । हुताशनेनमः । कृष्णवर्त्मने नमः । देवमुखाय नमः । सप्तजिह्वाय नमः । वैश्वानरा
य नमः । जातवेदसे नमः । मध्ये श्रीयज्ञपुरुषाय नमः । ध्यानं । ॐ चत्वारि शृंगा० । ततः मणिकोदकेन । प्रदक्षिण
मग्निं पर्युक्ष्य । हृदि सव्यहस्तं निधाय भूमौ दक्षिणं जानु निपात्य ताम्रपात्रेण वैश्वदेवान्नं गृहीत्वा घृतेनाभि राम
घारणं कृत्वा हस्तेन द्वादशनापूर्वपूरकमोदनमादाय जुहुयात् । ॐ ब्रह्मणे स्वाहा । ब्रह्मण इदं न मम । प्रजापत १५

येस्वाहा प्रजापतय इदं न० स्वाहाकारोपदेशादत्र संस्रवाभावः। इति देवयज्ञः। ततोऽग्नेः पश्चादुपविश्य तत्र बलि
हरणं आर्द्रामलकमानं मार्जार श्रवणप्रमाणं वा कुर्यात्। तत्र मणिकेत्रीनित्यादिक्रमेण। अत्र संस्रवाभावः। त
त्रायं क्रमः। ॐ पर्जन्याय नमः। पर्जन्याय इदं०। एवं त्यागः सर्वत्र। ॐ अद्भ्यो नमः। पृथिव्यै०। धात्रे नमः। विधात्रे०। वा
यवे नमः। ५। प्राच्यै दिशे नमः। दक्षिणायै दि०। प्रतीच्यै०। उदीच्यै०। ब्रह्मणे०। अंतरिक्षाय०। सूर्याय०। विश्वेभ्य
श्च देवेभ्यो नमः। विश्वेभ्यश्च भूतेभ्यो नमः। उषसे नमः। भूतानां च पतये नमः। इति भूतयज्ञः। ततोऽन्नं पिंडीकृत्य
प्राचीनावीती दक्षिणतः। ॐ पितृभ्यः स्वधा नमः। पितृभ्य इदं०। इति पितृयज्ञः। ततः सर्वं हुत्वा प्राङ्मुखो भूत्वा म
मणिकोदकेन पात्रं प्रक्षाल्य तज्जलं ब्रह्मादिबलिहरणेन याह्यपमांदिशि निनयेत्। तत्र मंत्रः। ॐ यक्ष्मैतत्ते निर्णे
जनं। यक्ष्मण इदं०। ततश्चाचम्य गोदोहनमात्रं प्रतीक्ष्यातिथिप्राप्तौ तमतिथिमासनादिभिः संपूज्य। अन्नं परिवेष्य
नीवीती। ॐ हंत तेनं मनुष्याय। इति संकल्प्य दद्यात्। इति मनुष्ययज्ञः। अत्र वा ब्रह्मयज्ञः। ततः पातु मार्गेण इति
विसृज्य। यस्य स्मृत्ये सा दिवदेत्। अस्यांगत्वेन ब्राह्मणं भोजयेत्॥ ततः गोग्रासं काकाबलिं च ब्राह्मणभोजनसम

येमम तुभ्यमपहृतं वा कुर्यात्॥ अथ गोग्रासः। तत्र मंत्रः सौरभेय्यः सर्वहिताः पवित्राः पापनाशनाः। प्रतिगृह्णंतु
१६ मे ग्रासं गावस्त्रैलोक्यमातरः। यद्वा। सुरभी वैष्णवी माता नित्यं विष्णुपदे स्थिता। गोग्रासं तु मया दत्तं सुरभि प्रतिगृह्य
16 तां। इति मंत्रेण गोग्रासदानं। अत्र स्नानेऽग्निसंस्पर्शाद्याभावः इति केचित्। अथ काकादिबलिः। तद्यथा। पात्रांतरे किं
चिदन्नं गृहीत्वा बहिरागमनभूमिं प्रोक्ष्य बलीन् दद्यात्। तत्र मंत्राः। ॐ ऐंद्रवारुणवायव्याः सौम्या वै नैरृतास्तथा। वा
यसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितं। वायसेभ्य इदं। १। श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ। ताभ्यां पिंडं प्रदा
स्यामि स्यातामेतावहिंसकौ। श्वभ्यामिदं। २। देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः। प्रेताः पि
शाचास्तरवः समस्ता ये चान्नमिच्छंति मया प्रदत्तं। देवादिभ्य इदं। ३। पिपीलिकाकीटपतंगकाद्या बुभुक्षिताः क
र्मनिबंधबद्धाः। ये चान्नमिच्छंति मया प्रदत्तं तेषामिदं ते मुदिता भवंतु। पिपीलिकादिभ्य इदं। ४। चतुर्दशो भूतगणो
य एष तत्र स्थिता ये किल भूतसंघाः। तत्र प्ययेऽन्नं मु विदत्त मेतत्तेषामिदं ते मुदिता भवंतु। सर्वेभ्यो भूतेभ्य इदं। ५। ततः राम
पादौ पात्रं च प्रक्षाल्याचम्य पात्रे किंचिदुदकं गृहीत्वा गृहद्वारं प्रोक्षयेत्। तत्र मंत्राः॥ शांतिरस्तु शिवं चास्तु मंगलं चास्तु १९

स्तु

३ प्रयांतु तत्रापि मिदं समपान्नं तेभ्यो विश्व यांतु त्वामि २

एवं सुखिनो भवंतु॥

सर्वतः। ततः द्यौः शांतिरिति मंत्रेण गृहद्वारं प्रोक्षयेत्। ततः सुविहितबलिदानं अन्यस्मिन्नग्नौ ब्राह्मणेषु गोषु वा
दद्यात्। इति पंचमहायज्ञाः। एते पंचमयज्ञा मसूराकोद्रवमाषकुलित्थकीटदुष्टाद्यैर्मेसंसृष्टेऽन्नेन कार्या
ततः अन्नादिना जलेन वा कार्याः। एवं कुर्वतः फलं स्वर्गादिति। अथैते पंचमहायज्ञा यावज्जीवमनुष्ठेयाः। मुख्य
कालाकरणे अस्तमयात्प्राक् कार्याः। अमासांत पंचानां लोपे पादकृच्छ्रः प्रायश्चित्तं। समस्तलोपे कृच्छ्रः। पंचा
नां मध्ये द्वयोरेकस्य वा लोपे उपवासः। अन्नादिष्वंचा अन्नाद्यसंभवे यद्देयं अतेन कार्यः। सर्वासंभवे जलादि
ना कार्या इति। अथ सायंप्रातरौपासनहोमविधिः। तत्र पारस्करः। उपयमनप्रभृत्यौपासनस्य परिचरणमस्त
मितानुदितयोर्दध्ना तंडुलैरक्षतैर्वेति सूत्रं। तत्रास्तमितलक्षणं छंदोगपरिशिष्टे। यावत्सम्यङ् न भासंते
नभस्यृक्षाणि सर्वतः। न च लोहिततामायाति तावत्सायं च हूयते॥ अथानुदितलक्षणं। तत्र विष्णुः। रात्रेः षो
डशभागे ग्रहनक्षत्रभूषिते। कालं त्वनुदितं प्राहुर्होमं कुर्याद्विचक्षणः। तथा। पूर्वां संध्यां सनक्षत्रामि
युक्तत्वात्। तथा। सूर्येऽस्तशैलसंप्राप्ते षड्भिः षड्भिरिहांगुलैः। प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात्

तस्माद्धयं मन्यामहे उदितहोमिनो व्यवच्छिन्नमग्निहोत्रमिति होवाचासुरिर्यथा शून्यमावस्यमा
हरेदेवमेतदिति।

१० अथानुदितस्य द्वैविध्यं॥ अनुदितः समयाध्युषितश्च तत्रानुदितः स्पष्टतारकोपलक्षितः। ततः परं उदयात्प्रा
क्समयाध्युषितः। तथा च मनुः। उदितेनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुति
रिति। संपूर्णादित्यमंडलादर्शनोपलक्षित उदितः तत्र वाजसनेयिनां नियमेनानुदितहोमः। सूर्यो ह
वा अग्निहोत्रं इत्यारभ्य तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहे इत्यंतेन श्रुतिसमाम्नायेनोदित
होमनिंदापूर्वकं अनुदितहोमस्य समर्थितत्वात्। छंदोगानां उदितानुदितयोर्विकल्पः। उदितेऽनुदिते चेति
गोभिलवचनात्। आश्वलायनानां पुनरुदितहोमनियमः। तथा च तैत्तिरीयब्राह्मणं। प्रातःप्रातरनृतं ते
वदंति पुरोदयात्। जुह्वति येग्निहोत्रं दिवाकीर्त्यमतः। सूर्यो ज्योतिर्न्नतदा ज्योतिरेषामिति। अनुदितहोमनिं
दार्थवादपुरःसरं तस्मादुदिते होतव्यमिति उदितहोमविधानादिति। केचित् उदितेपि सूर्ये आसायंका
लो गौणकाल इति तदुक्तं छंदोगे। आसायमाहुतेः कालः कालोस्ति प्रातराहुतेः प्रातराहुतिकालात्प्राक्का एम
लस्यात्सायमाहुतेरिति॥ केचित् हस्ताद्धूर्ध्वं रविर्यावत् भुवं हित्वा न गच्छति तावद्धोमविधिः पुण्यो नान्योभु १०

दिनहोमिनामिति। अथात्र वाक्यानि।। तत्र दक्षः संध्याकर्मावसाने तु स्वयं होमो विधीयते। स्वयं होमे फलं यत्तु तदन्येन
न जायते।। स्मृतिरत्नेऽपि।। अन्यैः शतकृता होमाद्देवः शिष्यकृतो वरं। शिष्यैः शतकृता होमाद्देकः पुत्रकृतो वरं। पुत्रैः श
तकृता होमाद्देको ह्यात्मकृतो वरमिति। तथा कौषीतकिः पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एतैरेव कृतं यत्तु तत्कृतं
स्वयमेव तु। तथा होमे यत्फलमुद्दिष्टं ऋत्विक्कृतं स्वयमेव तत्। हूयमाने तदन्येन फलमर्धं प्रजायते। यदि शक्तः स्वयं हो
तुः सर्वदा यजमानः सः। तदौपवसथे कुर्यात्स्वयं होमं प्रयत्नतः। कात्यायनः। स्वयं होमासमर्थस्य समीपमुपसर्पणं
तत्राप्यशक्तस्य सतः शयनाद्वोपवेशनं।। अत्र केचित् एतत्स्वयं होमाशक्तस्य कथनं स्मार्तविषयं। श्रौते पुनरुद्ध
रेदिति यजमानो ब्रूयादित्यादिनाऽध्वर्युकर्तृकत्वमुपक्रम्य प्रातः स्वयं वा कुर्यादित्यनुकल्परूपेणैव स्वयं होमस्या
क्तत्वात्। अध्वर्युपक्षे च प्रेषाद्यंगबाहुल्येन फलाधिक्यसंभवात् तत्कर्तृकत्वमेव मुख्यं। तदसंभवे एव स्वयं होमः।
यत्तु। स्वयं होमः। यत्तु। स्वयं होमाशक्तावुपासीतेत्यादि सूत्रं। तदप्यौपवसथ्यादि विषयमेवेति वर्णयंति। तत्र स्मृतिः
स एवं विद्वान्यमुपवसथे जुहोति सर्वदा हैवास्य स्वयं कृतं भवतीति। स्मृतौ सार्वदिकस्वयं होमे न सिद्धवदुप

वसथ्यस्वयंहोमस्य श्रुतिदर्शनात् तस्याश्च सार्थादिकृस्वयंहोमप्राशस्त्येऽनुपपन्नेऽतत्प्राशस्त्यमूलतयापश्यंतं
१८ नियतकर्तृत्वमता विधिरुन्नेय इति। श्रुतिविरोधे न्यायमात्रमकिंचित्करमेवेति चिंतनीयं॥ अथाशौचादौ नु
18
स्वयंहोमनिषेध एव। तथा गुरुः। सूतके च प्रवासे च अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्न तु हाप
येत्। तथा जाबालिः। जन्महानौ वितानस्य कर्मत्यागो न विद्यते। शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः। पंच
यज्ञविधानं तु न कुर्यान्मृत्युजन्मनोः। जन्महानौ जन्ममरणे। वितानं श्रौताग्निः। शालाग्निः स्मार्ताग्निः। वितानाग्नौ
सूतकाभ्यंतरे यजमानेन होमः कार्य इत्यर्थः। शालाग्नौ अन्यगोत्रजैः कार्यः। तत्रापि। एकाहाद्बुध्यत इति वचना
देकाहानंतरं स्वयमेव होमं कार्य इति। शातातपः। श्रौतं प्रत्यग् स्वयं कुर्यादन्योपि स्मार्तं समाचरेत्। अशक्तौ श्रौ
नमप्यन्यः कुर्यादावारंभं ततः इति। तथा जातुकर्ण्यः। सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत्। पिंडयज्ञं चरुं होमम् अस
गोत्रेण कारयेत्। संध्यामिष्टिं चरुं होमं यावज्जीवं समापयेत्। न त्यजेत्सूतके वापि त्यजन् गच्छेदधो द्विजः। याज्ञ०। वै एग
तानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनादित्युक्तत्वात्। औपासनस्यापं प्रातर्होमपिंडपितृयज्ञपक्षादितं तस्य ग १८

सादिप्रायश्चित्तहोमाः कार्याः असगोत्रेणेति केचित्। छंदोगो कात्यायनः। सूतके कर्मणां त्यागः संध्यादीनां विधीय
ते। होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनाथवा फलैः। अकृतं हावयेत्स्मार्त्ते तदभावे कृताकृतं। कृतमोदनसक्त्वादि तंडु
लादि कृताकृतं। व्रीह्यादि चाकृतं प्रोक्तं इति द्रव्यं त्रिधा बुधैः। श्रौते तु। जाबालः। शिवविष्णुर्चनं दीक्षा यस्य चाग्निपरि
ग्रहः। स तत्कर्माणि कुर्वीत स्नातः शुचिमवाप्नुयात्। तथा। उभयत्र दशाहानि सपिंडानामशौचकं। स्नानोपस्पर्शना
भ्यां सादग्निहोत्रार्थमर्हति। स्नानाचमनाद्यल्पेतरार्थः। केचित्तु सूतके स्वयमशक्तस्य पुत्रभ्रात्विजादीभिर्होमः कार्यः। इ
दं गृहीतदीक्षितस्यैवैविधस्य महामखेदूत्यर्थः। स्नातोऽग्निहोत्रं जुहुयात्कुर्वीणो युदकं स्वयं। कर्तुः सात्कालिकी शु
द्धिरन्यशुद्धः पुनरेव स इति जाबालिवचनात्। स्नात्वा स्वयं होमकरणे यद्दोषः। तत्र च अग्निहोत्रिणाम् अग्निहोत्रं इतिसघः
शौचविधानात्कर्मानर्हत्वरूपाशौचाभावेस्ति द्रूपि। यत्तु वैतानिकस्वयंकुर्यात्स्मार्त्तं कर्म निवर्त्तते। स्मार्त्तकर्मपरित्या
गोऽशौचाहोरन्यत्र सूतके। श्रौते कर्माणि तत्कालं स्नातः शुद्धिमवाप्नुयात्। इति वचनं तदस्थिसंचयनात्पूर्वं। अन्यत्रापि
यत्रांगाशौचं श्रुतं तत्रैव तं नितृस्यथ स्नानविधिरंप। अंगाशौचाभावे तत्स्नानं विनापि कर्त्तव्यमिति केचित्। स्मार्त्ते तुः।

पारस्करः यद्यपि नित्यानि निवर्त्तेरन्न वैतानिकवर्ज्जं शालाग्नौ चैके इति। तथा। सूतके तु समुत्पन्ने स्मार्त्तं कर्म निवर्त्तते इ
१८ ति मादिकमशौचे वैकल्पिकमिति केचित्। तथापि करपापह्नेन श्रौतवत् स्वयं कर्त्तव्यमपराणि पूर्ववाक्यानि। तथा होत
रनलभेताज्यं यदाठमतसूतके। स्नात्वा स्वयं च जुहुयात्स्मार्त्ते स्मार्त्ते विशेषतः तथा शुद्धिरत्नाकरे स्मार्त्ताग्नेर्विशेषः
19 एकाहाल्लभ्यते विप्रो योऽग्निवेदसमन्वितः। इति वचनादेकाहानंतरं स्वयमेव होमः कार्यः। तथा। दशाहं त्वा पिबेदा
पोशापत्याश्यादूध्भुक् द्विजः। पश्चात्संध्यामुपासीत होमं चैव यथाविधीत्यादिवाक्यसंदर्शनादसंभवे स्वयमपि होत
व्यं। तथा। स्मार्त्ते तु ऋत्विक्पुत्रगुरुभ्रातृभागिनेयानामन्यतमेन कार्यः। गोभिलः। काममगृह्याग्नौ पत्नी जुहुयात्सायं
प्रातर्होमाविति। तथा। नित्यं परिचरेद्धोमं स्वयं कर्त्तुमशक्नुवन्। अन्येन कारयेद्वापि त्यामंत्रं विना हुतमिति। आ
श्वलायनः। स्वयं पत्न्यपि वा पुत्रः कुमार्यंतेनिवासिनः। स्त्रीणां मंत्रानधिकारात्पत्नीकुमार्योर्होमकमित्यपरेऽस
होमकमित्यन्ये। कात्या०। असमक्षं तु होतव्यं दंपत्योर्नेतिंगादिना। द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकम्। सन्निधौ यज एम
मानस्यादुद्देशत्यागकारकः। असन्निधौ तु पत्नी स्यादध्वर्युस्तदनुज्ञयेति। छंदोगे। निष्क्रियाग्निं स्वदारेषु परिकल्प १८

त्रिंशंतथा। प्रवसेत्कार्यवान् विप्रः सदैव न चिरं व्रजेत्। उन्मादे प्रवसेन्मर्तुः कुर्वीतानुज्ञया विना। तथा। सूतके मृतके चैवम
ग्निकोदकसंक्षये। पूरयेद्विहितैर्मन्त्रैः सगोत्रो द्विजोत्तमः। चन्द्रिकायामपि। कालातीतेषु होमेषु उत्तरेष्वागतेषु च। काला
तीतानि कृत्वैव कृच्छ्राणि समाचरेत्। पत्स्वतीतान्यतीतान्यविकृत्य उत्तराणि समाचरेत्। देवाहुत्यं न गच्छति। अथ होम
द्रव्याणि। तत्र पारस्करः। दध्ना तण्डुलैरक्षतैर्वा जुहुयात्। तादन्नागमेन। तण्डुलैर्व्रीहिमयैः। अक्षतैः सतुषैर्यवैः वा विकल्पे
न। एतेषामेकतमेनेत्यर्थः। अथ होमविधिमाह। व्यासः। होमं व्रीहियवैः कुर्याद्दधिक्षीरघृतादिभिः। फलपुष्पैस्तग
व्येन पयसा चरुयवागूभिः। मरीचिः। दध्ना पिष्टेन पयसा दध्ना होमं घृतेन च। तथा। पयो दधि यवागूं च सर्पिरोदनतण्डुलाः
सोमो मांसं तैलमापो दशैतान्यग्निहोत्रके। स्यादग्निहोत्रवत् गृह्ये सर्वसंस्कारो मन्त्रवर्जितः। यद्वात्रिः प्रोक्षणं तेषां मासमो
पासनेन चान्यत्र पयसा होमे स्मृतिः। पयसि ह्रीहदः सर्वप्रतिषिद्धमिति तथा। शालिः श्यामाकनीवारा व्रीहिगोधूममा
षकाः। एतेषां वतण्डुला ग्राह्या मावनालाः। अयंगवाः। प्रियंगवः शालयः शुद्धगोधूमा व्रीहयो यवा वा। स्वरूपेणापि होमास्युः
स्वरूपेणैव वै तिलाः। द्रुंवस्त्रवेण होतव्यं पाणिनाकठिनं हविः। व्रीहीणां च यवानां च शतमाहुतिरिष्यते। तिला

नातस्तदर्धं स्यात्स्रुवमात्रं घृतस्य तु। तथा। अंगुष्ठपर्वमात्रं स्यादवदानं ततोऽपि च। ज्यायः स्विष्टं कृता स्यं च चतुरंगु
२० लसंमितं। तत्र वाजसनेयश्रुतिः। यदि पयो न स्यात्केन जुहुयादित्यादि। तथा। मुख्यासंनो यथा ग्राह्यः कार्यकालयो
संततौ। अत एव घृताभावे पूर्वं दधि ततः पयः। येषां केषां विदन्येषां हविषामप्यसंभवे। सर्वत्राज्यमुपादेयं भारद्वाज
20 मुनेर्मतात्। इति। तथा। सायं होमे च यद्द्रव्यं प्रातर्होमे वद्भवेत्॥ अथ द्रव्यप्रतिनिधिः। जाबालिः हविषां व्रीहिभि
र्यागो यवैर्वापि विधीयते। तदभावे तु सामान्यात्कुर्यात्प्रतिनिधिं बुधः। छंदोगे॥ हविष्ये मुख्यवा मुख्यास्तदनु व्री
हयः स्मृताः। माषकोद्रवगौरादीन्सर्वालाभेऽपि वर्जयेत्। मात्स्ये॥ यवगोधूमधान्यानि तिलाः कंगुः कुलत्थकाः
माषा मुद्गा मसूराश्च कोद्रवाः श्यामसर्षपाः। गवेधुकाश्च नीवाराः आढक्यश्च कलायकाः। चणकाश्चीणका
श्चैव धान्यान्यष्टादशैव तु। स्मृतिः। यवगोधूमधान्यानि तिलाः कंगुस्तथैव च। श्यामाकश्चीनकाश्चैव सप्तधान्यमु
दाहृतं। कात्यायनः। यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत्। यवानामिव गोधूमा व्रीहीणामिव शालयः। दध्यभा राम
वे पयसा कार्यं मध्वभावे तथा गुडं। घृतप्रतिनिधिं कुर्यात्पयो वा दधि वा सुधीः। दर्भप्रतिनिधिं कुर्याद्दूर्वाकाशस्तथैव २०

वचः। तथान्यत्रामुख्याभावेत्तत्सदृशं द्रव्यं प्रतिनिधीयते। यावद्यागस्तु सदृशं तत्र देवहिंसा गृह्यते। काम्ये प्रतिनिधिर्नास्तिनि
त्ये नैमित्तिके हि सः। काम्येषूपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः। तस्मात्प्रतिनिधिर्नोत्र स्वामिदेवाग्निकर्मसु। सदेशका
लयोस्तित्र अरण्योरग्निरेव स इति। तथा। हव्यार्थे गोघृतं ग्राह्यं तदभावे तु माहिषं। आजं वा तदभावे तु साक्षात्तै
लं गृह्यते। तैलाभावे गृहीतव्यं तैलं जर्तिलसंभवं। तदभावे तु निःस्नेहं कौसुंभसर्षपोद्भवं। वृक्षस्नेहोऽथवा ग्रा
ह्यः पूर्वाभावे परः परः। तदभावे यवव्रीहिश्यामाकान्यतमोद्भवं। विष्णुमालोक्य तोयेन घृतार्थे योजयेत्सुधीः। इति
तथा। यद्यागव्यघृतं छागमहिष्यादिघृतं क्रमात्। तदभावे गवादीनां क्रमात्क्षीरं विधीयते। तदलाभे दधि ग्राह्यं म
लाभे तैलमिष्यते। यत्राज्यमंगत्वेनादिष्टं न लभेत कथंचन। तत्र क्षीरघनादत्य तत्सान्द्रं तैलं गृह्यते। यत्र मुख्यं दधि क्षी
रं तत्रापि तदलाभतः। अजादेः क्षीरदध्यादि तदलाभे तु गोघृतं। इत्यादि। तथा शौनकः। पक्वानां तु ससंस्कारः कार्यस्त्रि
प्रोक्षणेन तु। अपक्वानां द्रवाणां तु संस्कुर्याद्भूतकर्मणि। ओदनादीनि पक्वानि क्षीरादीनि द्रवाणि ह। व्रीह्यादीनि
ह्यपक्वानि विधीनात्तु कुर्याद्बुधः। अथ श्रौताग्निहोमं कृत्वा स्मार्ताग्निहोमं कुर्यात्। यद्यपि। आवसथ्यमनादृत्यै

२१ नायं यः प्रवर्त्तते। सोनाहिताग्निर्भवति परिवित्तिश्च जायते इति वचनबलात् स्मार्त्ताधानस्यैव पूर्वकृतत्वात्तदनुरोधेन
तद्धोमः प्राप्नोत्याकृतिः। तथापि प्रातर्होमस्य च दर्शनं इति प्रकाशमात्रे साप्यं प्रागस्तमनादग्निहोत्रारंभविधानात्तन्मध्ये
स्मार्त्तहोमस्यास्तमितकालमात्रविहितस्यानुष्ठानानुपपत्तेः॥ तत्र भरद्वाजः॥ होमं वैतानिके कृत्वा स्मार्त्ते कुर्याद्विचक्ष
21 णः॥ स्मृतीनां श्रुतिमूलत्वात् स्मार्त्ते केचित् पुरा विदुः॥ गर्गः॥ यो वैदिकमनादृत्य कर्म स्मार्त्तैरिहासकृत्। होमान् समाचरे
द्विप्रो न स पुण्येन युज्यते॥ इति काम्यं च दृश्यते। यत्तु मुहूर्त्ते सायमग्निसमापनं तत् स्मार्त्ताग्निहोमानन्तरमेव। नान्यथा।
तत्कालबाधापत्तेः॥ एवं कथंचित्कालविलंबेन श्रौतहोममध्ये सूर्योदयसंभावनायां तत्प्रधानश्रौतानां तरं स्मा
र्त्तहोमं कृत्वैव तदुत्तरांगानि कार्याणि। नाग्निहोत्रात्परो धर्मो नाग्निहोत्रात्परं तपः। नाग्निहोत्रात्परं श्रेयो नाग्निहोत्रा
त्परा गतिः इत्यादिफलकः॥ अथ कुंडस्वरूपं। तत्र कात्यायनः। कुंडस्य पश्चिमं भागं अग्नेरास्यं प्रचक्षते। सर्वहो
मास्तु होतव्यास्तस्मिंश्च निधनं विना। तथा। पादौ पश्चिमतो वह्नेः पूर्वतः शिर उच्यते। दक्षिणे चोत्तरे हस्तावूर्ध्वं वक्त्र राम
मिति स्थितिः। वायुपुराणे। अर्चिष्मान् पिंडितशिखः सर्पिःकांचनसंनिभः। स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात्कर्म २१

सिद्धये। इति। तथा। स्वर्णसिंदूरं बालार्ककुंकुमक्षौद्रसन्निभः। जरिवाहित्रहस्तीदं ध्वानिर्वह्निः शुभावहः। तथा। अग्निः
प्रदक्षिणावर्त्तः कर्मदः स्व शुभावहः। इति अथाग्नीनां प्रादुष्करणं स्ववं कर्त्तव्यं। स्वकरणासामर्थ्ये नुकम्पमाहका
त्यायनः। दुहित्रा स्नुषया वापि विहारो न वितस्यते। निर्लेपनं च पात्राणामुपलेपनमर्चनमिति अथ श्रौपासनवि
धिः। तत्र जाबालिः। जान्वाच्य दक्षिणं भूमौ देवं कर्म समाचरेत। सव्यं जानुं तथा चाच्य पित्र्यं कुर्वीत नान्यथा। पारस्क
रः। उपयमनात् कुशानादायति शून्स मिधोभ्याधायपर्युक्ष्य जुहुयात्। तत्र। सप्तपत्राः शुभावदर्भा व्रह्मग्रंथिस
मन्विताः। उपयमनकुशाः प्रोक्ता अग्निकार्यादिकर्मसु। समिधोभ्याधो येति अत्र होमात् प्रागग्नौ काष्ठाधानं
पुरुषार्थप्राप्त्यां समिधोभ्याधायेति। समिधमादधत्यग्निज्योतिषमिति एवं कर्मांगविहितेन तंत्रसिद्धं। तत्रैवाने
ककाष्ठाधानं वैश्वदेवादिहोमार्थं। तत्रैव होमं करोति यो विप्रः स फलसीकाश्ववद्धिषु। शातकृतसमं पुष्पंपही
तात फलमाप्नुयादिति॥ अथ कुशसमिदादिलक्षणं॥ तत्र कुशादिग्रहणं। तथा प्रणीतासनमासाद्य त्रयपत्र
यउदीरिताः अष्टाविंशतिभिर्दर्भैः व्रह्मार्थं व्राह्मणाय च। पर्यग्निकरणे चैको द्योतने च सपत्रजाः। चतुर्भिश्च

तर्भिश्च स्कन्दस्कन्दौ प्रतिपत्स्य च। सर्वेषु पितृकार्येषु त्रीण्येकं च समूलं समूलतः। देवकार्येषु दर्भौ द्वौ भवेदेकस्तु पैतृ २२

के। इति। तथा। समिदादिषु होमेषु मंत्रदैवतवर्जितं। पुरस्ताच्चोपरिष्टाच्च संधनार्थं समितं भवेत्। तथा। सर्वेषा

मेव होमानां समिदाद्यो निधीयते। कर्मांते सर्गे च देया सा स्वाहांतं तत्र न कारयेत्। मौनेन सर्वत्र समिद्धोमः कार्यः। अ

22 करणे श्रीहानिः स्यात्। जाबालिः। अथ नित्यो भवेद्धोमः सायमादुपक्रमः। प्रातरादुतिसंस्था च तस्य क

र्मोच्यते क्रमात्। आहरेदनु गुप्तास्तु प्रागे वास्तमयाद यः। परिवर्यार्थमग्नेस्ताः प्रातश्चैव पुरोदयात्। तदाह

ति स्कन्दघादेः कुंभावा मणिकादपि ताभिरद्भिः परिस्थाल्यं हविः श्राप्य कृतं यदि। ततोऽग्निं प्रकटीकृत्य श्रासा

घापोह विस्तदा। यज्ञोपवीत्यथाचांतः सायमस्तमितेरवौ। प्रज्वाल्याग्निं च संस्कृत्य कृत्यस्त्रासाघातपोहविस्त

दा। यज्ञोपवीत्यथाचांतः सायमस्तमिते रवौ। प्रज्वाल्याग्निं च संस्कृत्य कृत्वा पर्युक्षणं ततः। परिस्तीर्य कुशैर्भूमौ द

क्षिणं जानु निक्षिपेत्। अत्र परिस्तरणं निष्क्रोपासनवैश्वदेवादन्यत्र श्रौतादो भवति। यथा। आग्नेग्राः समिधोऽकु राम

त्वादीप्तायां समिधि स्वयं। सांगुष्ठाभिरंगुलीभिः समादाय द्रवं हविः। उत्तानेनैव होतव्यं पाणिना वाहवेण वा २२

हुत्वा च पूर्ववत् वह्निं पर्युक्ष्य चरणमिध्मं च । एवमेवोदयात्पूर्वं जुहुयात्प्रातराहुतीः ॥ सायं प्रातः क्रमेणैवं प्रयोगः प्रथ
मे स्वयं । कुर्याद्धोमं ततः पत्नी वान्यो वा स्वयमेव वा । होमपात्रमनादेशे द्रवश्रुवस्समिधः । पालाशाश्च त्वन्यग्रो
धः प्लक्षवैकंकतोद्भवाः । काश्मर्योदुंबरो बिल्वश्चंदनः सरलस्तथा । शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ॥ नांगुष्ठाद
धिका कार्या समित्स्थूलतया क्वचित् । प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका ॥ न विभिन्ना सत्वचा चैव न कीटैर्न पाटि
ता तथा । अवक्रा अव्रणाश्चैव साद्री कीटादिवर्जिताः ॥ सत्वचो ग्रंथिरहिता ग्राह्याः प्रादेशसंमिताः । तिस्रः प्रागग्राः स
मिधो देयादीनायां समिधिस्स्वयमिति । श्रौते तु प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितं । तथान्यत्र । पालाशखदि
राश्वत्थस्युदुंबरजा संमितं । अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपविदुः ॥ सत्वच समिधः कार्या ऋज्वः श्लक्ष्णाः समा
स्तथा । शस्ता दशांगुला सा स्रुक् द्वादशांगुलकास्तवा । आर्द्राः पक्वाः समच्छेदास्तर्जन्यंगुलिवर्तुलाः ॥ अपाटिताश्चापा
कृमिदोषविवर्जिताः । दग्धाः कृशास्तथा स्थूला कृष्णा दीर्घाश्च वर्जयेत् । यद्वा समित्सवित्त्रं वेदस्रुत्रयः प्रादेशमा
त्र इति ॥ अथ आहुत्यादि प्रमाणं । तथा । या एषा हुतिर्द्वादशपर्वपूरिका रसादिना चरुश्चवमात्रपूरिका । दैवेनती

येनच हूयते हविः स्रुगग्रेणि स्वर्चिषि तच्च यावत्के पीनर्चिषि जुहोत्यग्नौ यं गारिणि च मानवः। मंदाग्निरामयावी च दरि
२३ द्रश्च स जायते। तस्मात्समिद्धे होतव्यं नासधेकथं चन। आरोग्यमिच्छता पुत्रश्रियमायुः संततिकीर्तिं तथा। जुहुयच्च
23 हुते चैव पाणिशूर्पस्फुटादिभिः। न कुर्यादग्निधमनं कुर्याद्व्यजनादिना। मुखेनैव धमेदग्निं मुखाद्ध्येषो ऽध्यजायत। ना
ग्निं मुखेनेति तु यत् लौकिके योजयंति तत्। अथात्रावसथ्याधाने प्रथमप्रयोगे नांदीश्राद्धादीनि कृत्वा सायंहो
मं कृत्वा भुंजीयात्। तत्र काण्वा लवणेन भोजयेत्तस्मादपि रूसां स्वशक्तितः। यजमानः स्नातोऽश्नीयादिति कात्यायन
नो ब्रवीत्। तथा। हुत्वाग्निकार्यं यः कुर्याद्भस्मना तिलकं नरः। स सर्वपापविनिर्मुक्तः सुरलोके महीयते। विभूतिर्भूतिद
प्रोक्ता प्रातरंभो विमिश्रिता। अंभो विरहिता सा च सायं होमे विधीयते। तत्र। श्रौतस्मार्त द्विजामुख्यं स्मार्तं गौणं प्रकीर्ति
ता। तथा। सायमादि प्रातरंतमेकं कर्म प्रचक्षते। पौर्णमादि च दर्शांतमेकं कर्म प्रचक्षते। अतः सायं होमकर्त्रैव प्रातर्जु
हुयात्। त्यागस्तु यजमानेन कार्यः। तत्र शुक्लादि देवतायागे समचैतं निरूपत इति न्यायात् देवताप्रतिपादकचतुर्थ्यं राम
तशब्दोच्चारणमावश्यकं। तदाकांक्षापूर्त्यै इदमिति द्रव्यशब्दप्रयोगः। तेन इदमग्नये इत्येतावदेव यजमानेन प्रमोक्तं २३

पत्न्याः स्वानुमतिमात्रमेव त्यागः। उक्तं च कर्काचार्यैः। पत्नीददातीति सूत्रं। दीयमानमनुजानातीति व्याख्यातं। अन्यथा रज
स्वलायां पत्न्यां त्यागासंभवादकरणं त्वापत्तेः। अत्र स्वयं होमाशक्तौ ऋत्विगादिभिः कार्यः। तेषामसंभवे अनुपनीतेन ब्रा
ह्मणेः स्त्रिया वा। तथा। न वै कन्या न युवतिः बाला हुतेः न बालिशः। होता स्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा। नरके
हि पतंत्येते जुह्वतः सर्व एव ते इति। अयं निषेधः श्रौत एव अत एव गोभिलः। कामं गृह्याग्नौ पत्नी जुहुयादिति। तथा आप
लिग्रह्याधिग्रहं परिचरेत्स्वयं पत्न्यपि वा। कुमार्यंतेवासी वेति। अथात्र प्राजापत्याहुतेः श्रौतवत् द्वितीयाहुतेः प्राजा
पत्यत्वेपि न तूष्णीं होमः। इति करणेन स्वाहांतस्य मंत्रत्वात्। द्वितीयाहुत्यनंतरं पुनः पर्युक्षणं॥ श्रीहरस्मरणं द्वंद्वमा
धाय हृदयांबुजे। सिद्धभद्रतनूजेन काशीपुरनिवासिना। रचितः श्रीनृसिंहेन सायंहोमादिनिर्णयः॥ अथ सायंप्रात
र्होमविधिः। तत्र प्रथमप्रयोगे। अग्नेरेकदेशं महानसे नीत्वा तत्र पाकं कृत्वा तमग्निं शालाग्नौ निक्षिप्य ततः कर्त्ता। प्राङ्मु
खोपविश्य पत्नीं दक्षिणतः उपवेश्य। प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातर्होमनिमित्तं
मातृपूजनपूर्वकं नांदीश्राद्धं करिष्ये इति संकल्प्य मातृपूजनं नांदीश्राद्धं च कृत्वा। ततः संध्यावंदनानंतरं पश्चा

सहाग्नेः पश्चात्प्राङ्मुखोपविश्य।तंडुलादिहोमद्रव्यसमित्कुशाद्यग्रे कृत्वा ततः प्रांचमासाद्य।सायंप्रातरौपासनहोमं
२५ कुर्यात्।तत्रायंक्रमः॥ प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातरौपासनहोमं करिष्ये।तत्रे
दानीं सायमौपासनहोमं करिष्ये।इति संकल्प्य।अग्निं पूर्वादिक्रमेण अग्नये नम इत्यादिना समभिगंधादिनाभ्यर्च्य।ॐ
24 चत्वारिशृंगा०।एवं ध्यात्वा।अग्नये स्वाहा।प्रजापतये स्वाहेत्यनयोः प्रायो युगादयो ऋषयः।गायत्र्यनुष्टुभौ छंदसी।अग्नि
प्रजापती देवते सायमौपासनहोमे वि०।ततः उपयमनीकुशानादाय।तिष्ठन्समिधोभ्याधाय।प्रदक्षिणमग्निं
पर्युक्ष्य।हृदि सव्यहस्तं निधाय।दक्षिणजानुं भूमौ निपात्य पाण्यगतो जुहुयात्।अत्र संस्रवाभावः।होमद्रव्येन ह
स्तेन घृतादिचेत्स्रुवेणावदाय।ॐ अग्नये स्वाहा।अग्नय इदं०।प्रजापतये स्वाहा।प्रजा०।प्रदक्षिणमग्निं पर्यु
क्ष्य।ततः कश्यपस्येत्यादिना विभूतिधारणं।गोत्रोच्चारणं।नमस्कारः।ततः कृतांजलिरग्न्यभिमुखो जपेत्। एमं
समास्त्वेति नवर्चस्य।अग्निरृषिः।त्रिष्टुप्छंदः।अग्निर्देवता।अग्रवि०।ॐ समास्त्वा०८।यदूा।ॐ अस्माजपस इति २५
सप्तदर्शं जपेत्।ततः ॐ नमो ब्रह्मणे इत्यादिना स्तुतिः।प्रमादात्कुर्वतां०।यस्य स्मृत्या०।मंत्रहीनं०।अनेन सायं

मौपासनहोमेन भगवान् श्रीलक्ष्मीनारायणः प्रीयतां। ततः पंडमातृगणाः इति मातृविसर्ज्य ततः ब्राह्मणभो
जनादि कुर्यात्॥ इति सायमौपासनविधिः॥ अत्र होमस्य मुख्यकालातिक्रमे तदा गौणकाले पिञ्जनादिष्टं प्रायश्चि
त्तं कृत्वा होमः कार्यः। तत्राप्यसंभवे लोप एव। होमलोपे सहस्रगायत्रीजपः। प्रातर्होमस्य। आसायं गौणः कालः। प्रा
तः अनुदित एव मुख्यकालः। तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहे इति श्रुतेः। मुख्यकालादतिक्रांत
आगामिकालात् गौणः। तथा चोक्तं छंदोगपरिशिष्टे। मुख्यकाले यदावश्यं कर्म कर्त्तुं न शक्नुते। गौणकालेपि
कर्त्तव्यं गौणोप्यत्रेदृशो भवेत्। आसायमाहुतेः कालः कालोस्ति प्रातराहुतेः। प्रातराहुतिकालात् आकालस्यान्सा
यमाहुतेः। पौर्णमासस्य कालोपि विघतइत्यादि। रजोनीहारधूमवृक्षाग्रान्तरितसूर्ये संध्यावंदनं पूर्वकं होमः।
कर्त्तव्यः। संध्याकालं ज्ञात्वा नीहारादिव्यपगमे होमे कृते। पुनः सूर्यश्चेद्दृश्येत तदा भवतन्नइत्यग्निमुपस्थाय होमं कु
र्यात्। अथ प्रातर्होमविधिः। तत्रायं क्रमः। तत्रायं क्रमः। तत्र सूर्योदयात्पूर्वमग्नेः प्रादुष्करणं कृत्वाग्नेः पश्चात्सत्वा
सहोपविश्य तंडुलदधियवघृतान्यन्यतमं होमद्रव्यं उपयमनकुशान्समिधः। स्तिसः। अग्रेऽन्तरतः प्रांचमासाद्य

जुहुयात्॥ प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पूर्वसंकल्पितप्रातरौपासनहोमं करिष्य इ-
२५ ति संकल्प्य॥ अग्निं पूर्वादिक्रमेण गंधादिभिरभ्यर्च्य येनमः। हुतवाहनायनमः इत्यादिनामभिरभ्यर्च्य। ॐ चत्वारि शृं-
25 गा ० एवं ध्यात्वा ० ततः सूर्याय स्वाहा। प्रजापतये स्वाहेत्यनयोः। प्रामीमेधावसिष्ठौ ऋषयः। गायत्रीत्रिष्टुप्छंदसी।
सूर्यप्रजापती देवते प्रातर्होमे विनि० ततः उपयमनकुशानादाय तिष्ठन् समिधौ स्वाधाय। प्रदक्षिणमग्निं प-
र्युक्ष्य। दक्षिणहस्तं निधाय। दक्षिणं जानुं भूमौ निपात्य। होमद्रव्यं स्रुवादिनादायवाग्यतो जुहुयात्। ॐ सूर्या-
य स्वाहा। सूर्यायेदं। ॐ प्रजापतये स्वाहा। प्र०। प्रदक्षिणमग्निं पर्युक्ष्य। ततः कश्यपरूपेत्यादिना विभूतिधार-
णं। गोत्रोच्चारणं। नमस्कारः। ततः विभ्राडित्यनुवाकस्य। विभ्राड्बृहदित्यादिकस्य ऋषिः। गायत्र्यादि छंदांसि। सूर्यो देव-
ता। सूर्यस्तुतौ वि०। ॐ विभ्राड्बृहत् ०॥ १॥ ततः ॐ नमो ब्रह्मण इत्यादिना स्तुतिः। प्रमादात्कुर्वतां ० यस्य स्मृत्या
च ० मंत्रहीनं ० अनेन प्रातरौपासनेन भगवान् श्रीलक्ष्मीनारायणः प्रीयतां। अत्र सायंहोमे यद्द्रव्यं तदेव प्रातर्होमे एम
कार्यं॥ इति प्रातर्होमविधिः॥ अत्र संस्रवाभावः। तदुक्तं कात्यायनेन। पाकयज्ञेष्ववत्तस्य सर्वहोमो हुत्वा शेषप्रा- २५

शनं। ते च पाकयज्ञाः। हुतोऽहुतः प्रहुतः प्राशित इति। तत्र हुतः सायंप्रातः क्रियमाणो हुतहोमः। अहुतः स्वस्त
रायो हरणादि होमबलिप्राशनैर्वर्जितः प्रहुतः स्मृहोमबलिप्राशनान्वितः पक्वादिः। प्राशितश्च सर्वासां पयसि
पायं संश्रेपयेदित्यादिके केवलप्राशनात्मकः। अष्टकं च। चत्वारः पाकयज्ञाः स्युर्ब्रह्मयज्ञश्च पंचमः। एते पंचमहायज्ञाः
प्रत्यहस्स्वतकारयेति। अथात्र सायंप्रातर्होमे विहितकालात्याकृत्यां प्रातर्होमानुष्ठाने सायंप्रातर्होमयोरेकक
र्तृत्वेन सायंमारंभस्यैव प्रातर्होमनिमित्तत्वात् प्रातःकालस्यात्यंगमात्रत्वाद्गौणाभावेपि समापनेनिमित्तस्य निवृ
त्तत्वांत्र काले पुनः क्रिया। सायंकाले पुनर्मुख्यातीतकालात्याहृते तत्काले पुनः क्रिया यनुरज्ञोनीहारखूत्रा
भ्रशाखाद्यंतरिते रवौ। संध्यामुद्दिश्य जुहुयाद्धुतमस्य न लुप्यत इति कात्यायनः। तस्य हुतेन लुप्यत इत्यनेन
होमलोपसंभावननिवर्तकत्वात् सर्वथा कालज्ञान एव तत्संभावनासंभवात् सर्वथा तत्कालपरिज्ञापरामि
ति। तथा प्राणाधीनाः सदा कालाकालाधीनाश्च देवताः। वरमेवाहुतिः कालेनाकाले कोटिसंमिता। ला
स्माद्धोमदानानंतरं मा दिन दर्शनादपि व्रतलोपाभावाद्यात्र हुतहोमो न कर्तव्यः। केचित्तु भवतंन इति मंत्रे

णाग्निं समुपस्थाप्य पुनर्होमः कार्य इति वदन्ति केचिदत्र संध्याहोमलोपेऽप्यष्टोत्तरसहस्रगायत्रीजपः प्रायश्चित्त
२६ मिति ॥ अथ यस्मान्नोऽग्निर्यदि होमकाले विनश्यति तदा मंथेनेनाग्निमुत्पाद्य गौणकालेपि होतव्यं । न तु मुख्यका
लानुरोधेन श्रौतहोमवल्लौकिकाग्न्यादौ होमः कार्यः । तत्र मथ्यमानश्चेन्न जायेत । यमहूत्तेणैदापश्यन्नमा
26 हृत्याभिजुहुयादिति लौकिकाग्निविधानात् स्मार्ते तदभावादिति केचित् । अपरे तु । यज्ञिये कोष्टशकलेऽश्रोत्रि
याग्नौ जलेपि वा । विप्रस्य दक्षिणे हस्ते कुशस्तंबे च कांचने । अजाकर्णे च मेधावि जुहुयादग्निलोपतः । इति व
चनादेतदन्यतमे मुख्यकाल एव होतव्यं । एतदसंभव एव गौणकाल इत्याहुः । तत्रैतद्द्वाकस्य गौणकाले
प्यग्न्यनुत्पत्तिविषयतयाग्निहोत्रविषयतया चोक्तत्वेः । नाप्यनुज्ञारहिते लौकिकादौ स्मार्ते होमो युक्त इति
प्राकृतन पक्ष एव समीचीन इति । अज्ञानान्मथिते त्वग्नौ पूर्वोऽग्निर्यदि दृश्यते । मथितं तं समारोप्य पूर्वे होमो वि
धीयते । तत्र प्रथमेऽग्नौ दृष्टे प्रायश्चित्तहोमं कृत्वा मथितमग्निमरणिमयं ते योनिरिति मंत्रेण समारोप्य पूर्वेऽग्नौ एम
होमः कार्य इत्यर्थः । इदमग्नि अथ आवसथ्याधाने पक्वादि होमविधिः । तत्र पारस्करः । पक्वादिषु स्थालीपा २६

कर्ष॰ अपइत्येत्यादिका॰। सापमादि प्रातरंतमेकं कर्म प्रचक्षते। पौर्णमास्यादि दर्शांतमेकं कर्म विदुर्बुधाः॥ इति वच
नात्व्कक्षपक्षे यदाख्यानं तदा दर्शमनिष्ट्वैव पूर्णमास्यां पक्षारंभः। तत्र श्रौतवत् पौर्णमासीप्रतिपदारंभार्थेनापेक्षणी
या। तत्र पौर्णमासादिदर्शांतकर्मैकावत् अत्र दर्शपूर्णमास्यां पक्षारंभः। तत्र श्रौतवत् पौर्णमासीप्रतिपदारंभार्थे
नापेक्षणीया। तत्र पौर्णमासादिदर्शांतकर्मैकावत्। अत्र दर्शपूर्णमासादिकर्मणोरैक्ये प्रमाणाभावात्। प्रत्युतप
क्षादिषु स्थालीपाकमिति पक्षादावेव कुर्वीतेत्यादिना प्रतिपर्वकर्मभेदस्यैव प्रतीतेः। का॰। ऊर्ध्वं पूर्णेन्दुते दर्शः पूर्ण
मासोपि चाग्निमः। पशुयागातिसहोतव्यः स एवादिरिति श्रुतिः। तत्र परिशिष्टे नात्र दर्शांतं पौर्णमासाद्यमिति स्मृ
तिवचनदर्शनारणीयं। श्रुत्या स्मृतेर्बाधात्। अत एव नोत्सेष्विदं स पक्षादिकरणसमाचारः। यत्तु हरिहरेणैतद्वा
क्यं पुनराधानविषयं। छंदोगविषयं वेत्युक्तं। तदयुक्तं। तत्कथंचित् तत्कालतद्देवतादिसाम्येन कर्मकाभ्रममूलक
मेव। छंदोगपरिशिष्टे पक्षादावेव कुर्वीत सदा यक्षादिकं चरुं। पूर्वोद्युः एव कुर्वीत विधेयं न्येमनीषिणः। जाबालि
: होमो दर्शप्रतिपदि स्थालीपाकस्य कीर्तितः। अग्रे रग्नीषोमयोश्चैंद्राग्नोश्च ततः परं। द्वितीयाचाद्वुतिर्विष्णो

२०
27

रथवाहाग्नेयेचोदनात्। अग्नेरग्नीषोमयोश्च पुनरध्येतयोस्तथा। पौर्णमासीप्रतिपद्दिवरूढहोमो विधीयते। तत्र मुख्यका
लातिक्रमे पौर्णमास्यात्यये द्रव्यं होतावापदहभवित्। तदहर्जुहुयादेवममावास्यात्यये पिच। तथा। पक्षादिहोमेत्व
हूतेप्रायश्चित्तादनंतरं। कुर्यात्त्रंपक्रमध्यस्त्वादिनेप्येकत्र कुत्रचित्। इत्यादिवचनादिनांतरे प्यनादेशपूर्वकं कर्तव्यं। गौ
णकालस्यातिक्रमे त्वग्रयेपथिकृते चरुः। एवं स्वयमशक्तावन्येनापिकारणीयं। स्मार्त्तेप्यसामर्थ्ये अन्यकर्तृकत्वा
भ्यनुज्ञानात् यरिशिष्टे। विदध्याद्धोमन्यश्चेद्दक्षिणार्धहरोभवेत्। स्वंपंचेमर्थः। अतएव गोभिलसूत्रे। ब्रह्मणोऽला
मे ब्रह्मस्थाने छत्रमुत्तरीयं वोदकंपूर्णकमंडलुंवा। दर्भमुष्टिंवानिधायकर्तव्यं। परिशिष्टेचापंचाशद्भिः कुशैर्ब्रह्म
यज्ञे कर्मणि कल्पते विष्टरः पंचविंशत्या यवित्रं द्विकुशास्मृते। ऊर्ध्वकेशो भवेत् ब्रह्मा लंबकेशस्तु विष्टरः। दक्षिणा
वर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः। छंदोगः यज्ञवास्तु विमुष्टां च स्ते वै दर्भबटो तथा। दर्भसंख्यानविहिनावि
ष्टरास्तरणेष्वपी। इतिपक्षहोमविधिः॥ अथपक्षादिमुख्यालीपाके। वैश्वदेवः किंप्राकृकर्त्तमः उत पश्चात् सम
तंत्रकारिकाः। श्राद्धार्थं पचनं खंड वैश्वदेवार्थमन्नकं। पाकद्वयमयुक्तं तु पंचयज्ञैककर्मणि। सर्वार्थत्वेन २०

पाकस्य सर्वकर्मार्थतां भवेत्॥ निर्णीतं नांततां नैव सुक्ताकर्कोदयोत्तुवनाऽपि तत्पन्नत्तु निर्दृष्टमनुवाको पि तत्कृतः॥पू
र्वेत्तरेकत्वदृष्टं दृष्टफलैकत्वेन लब्धं यत्॥ नैकस्मिन् कर्मणि तंत्रो कर्मणामेपन्नापतेयतः॥ कात्यायननिषेधाच्च अवधानंनं
युज्यंते॥ श्रीकृष्णचरणद्वंद्वं ध्यायहृदयांबुजे॥ सिद्धमंदततनूजेन काश्मीरपुरनिवासिना॥ रचितः श्रीनृसिंहेन स्थ
लीपाकादिनिर्णयः॥ अथ पश्चादिकर्मप्रयोगः॥ तत्रायं क्रमः॥ तत्र प्रथमप्रयोगे आधानसमनंतरमेव शुक्लायां प्र
थमायां प्रतिपदि स्थालीपाकं कुर्यात्॥ तत्र नित्यहोमं कृत्वा प्रतिपदि पूर्वाह्णे एव॥ अग्नेरेकदेशं महानसे नीत्वा तत्र
वैश्वदेवचरुं कृत्वा तमग्निं पुनरावसथ्ये निर्वपेत्॥ यदा प्रथमप्रयोगे नांदीश्राद्धं मंनादिना करोति तदा पाकद्वयं कृ
त्वा निर्णीतनांतं वैश्वदेवचरुं कृत्वा नांदीश्राद्धं कृत्वा पश्चादि कर्म च कृत्वा पुनर्वैश्वदेवो न कार्यः॥ द्वितीयपक्षे होमेत
पक्षे होमं कृत्वा वैश्वदेवः कार्यः॥ तद्यथा॥ तत्राग्नेः पश्चिमतः प्राङ्मुख उपविश्य॥ प्राणानायम्य देशकालौ संकी
र्त्य श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यामहं यक्ष्ये॥ तत्रेदानीं पौर्णमासेन स्थालीपाकेनाऽ
हं यक्ष्ये॥ इति संकल्प्य॥ तत्र पश्चादिकर्मारंभनिमित्तं मातृपूजनं पूर्वकं नांदीश्राद्धं च करिष्ये इति संकल्प्य॥ मातृपूज

नपूर्वकं नांदीश्राद्धं कुर्यात। इतिविशेषसंकल्पः॥ ततः अग्नेर्दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्माणम्। ॐ प्रजा॰ अ
२८ अग्निगंधादिभिरभ्यर्च्य वायव्यतो जुहुयात्। ततः स्रुवेणाज्यं गृहीत्वा ब्रह्मणान्वारब्धः। ॐ इंद्राय स्वाहा। इंद्राय इदं
॰। अग्नये स्वाहा। अग्नये इदं॰। सोमाय स्वाहा। सोमाय इदं॰ ततः स्थालीपाकमभिघार्य स्रुवेण चरुमवदा
य। ॐ अग्नये स्वाहा। अग्नये इदं॰। अग्नीषोमाभ्यां स्वाहा। अग्नीषोमाभ्यामिदं॰। उपांशु। ॐ अग्नीषोमाभ्यां
स्वाहा। अग्नीषोमाभ्यामिदं न॰। उच्चैः। ॐ ब्रह्मणे स्वाहा। ब्रह्मणे इदं॰। ॐ प्रजापतये स्वाहा। प्र॰ ॐ विश्वेभ्यो दे
वेभ्यः स्वाहा। विश्वे॰ इदं॰। ॐ द्यावापृथिवीभ्यां स्वाहा॰ द्यावा॰ इदं॰। ततः हुतशेषं स्रुवेणावदाय अग्नेरुत्त
रतः प्राक्संस्थानि त्रीणि बलिहरणानि भूमौ दद्यात्। ॐ विश्वेभ्यो देवेभ्यो नमः। विश्वेभ्यो देवेभ्य इदं॰ ॐ भूत
गृह्येभ्यो नमः। भूतगृह्येभ्य इदं॰। ॐ आकाशाय नमः। आकाशाय इदं॰। एतेषां नमःस्थाने स्वधाप्रक्षेपः। ततः वैश्वदेवा
न्नमभिघार्य स्रुवेणावदाय। ॐ अग्नये स्वाहा। अग्नये इदं॰। ॐ प्रजापतये स्वाहा। प्रजा॰। ॐ विश्वेभ्यो देवेभ्यः स्वाहा। एम
विश्वेभ्यो देवेभ्य इदं॰। ततः वैश्वदेवान्नराधात् स्थालीपाकान्नराधादंने स्रुवेण गृहीत्वा। ॐ अग्नये स्विष्टकृते स्वा २८

28

हा। अग्नये स्विष्टकृते इदं। ततः घृतेन। ॐ भूः स्वाहा। अग्नये इदं। ॐ भुवः स्वाहा। वायवे इदं। स्वः स्वाहा। सूर्याय इ-
दं। ॐ त्वन्नो अग्ने। अग्निवरुणाभ्यामिदं। स त्वन्न अग्निवरुणाभ्यामिदं। ॐ अयाश्चाग्ने। अयसे अग्नये इदं।
ॐ ये ते शतं। वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च इदं। ॐ उदुत्तमं। वरुणायादित-
ये च इदं। ॐ प्रजापतये स्वाहा। प्र० इदं। ततः संस्रवप्राशनं पवित्राभ्यां मार्जनं। अग्नौ पवित्रप्रतिपत्तिः। ब्रह्म-
णे वरदानं। प्रणीताविमोकः। शांतिवचनं। आपः शिवाः शिवतमाः शांततमास्तास्ते कृण्वंतु भेषजं। अग्ने-
रलंकरणं। ततः स्थालीपाकहुतशेषमादाय बहिर्गत्वा प्राङ्मुख उपविश्य भूमिमुपलिप्य स्रुवेण चरुमव-
दाय प्राक्संस्थं बलिहरणं कुर्यात्। तद्यथा। ॐ नमः स्त्रियै स्त्रियै इदं न मम। नमः पुंसे वयसे वयसे इदं। न-
मः शुक्लाय कृष्णदंताय पापीनांपतये। शुक्लाय कृष्णदंताय पापीनांपतये इदं। नमो ये मे प्रजामुपलोभ-
यंति ग्रामे वसंत उत वारण्ये तेभ्यः। नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्य इदं। नमोस्तु ब-
लिमेभ्यो हरामि स्वस्ति मे अस्तु प्रजां मे ददतु। मंत्रोक्तदेवताभ्य इदं। शेषं अन्ने अद्भिः प्रप्लाव्य। ततः कुंडसमी-

पमागत्याग्निं गंधादिभिः संपूज्य कश्यपश्यपेति विभूतिधारणं। गोत्रोच्चारणं। नमस्कारादिकं च कुर्यात्। ततः अ
२९ स्यांगत्वेन एकस्मै ब्राह्मणाय भोजनं दास्ये इति संकल्प्य। यस्य स्मृत्या०। मंत्रहीनं। यां हमात्रगणा इति विसर्जयेत्।
इति पश्वादिकर्मप्रयोगः। दर्शयागे विशेषः। प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पूर्वसंकलि
29 त दर्शस्थालीपाकेनाहं यक्ष्ये। इति संकल्प्य। ब्रह्मवरणादि आज्यभागांतं कृत्वा। स्थालीपाकेन चरुणा। ॐ अ
ग्नये स्वाहा। अग्नये इदं०। उपांशु। विष्णवे स्वाहा। विष्णवे इदं०। ॐ इंद्राग्निभ्यां स्वाहा। इंद्राग्निभ्यामिदं०। शेषं पूर्व
वत्। ततः अनुस्थितस्य वैश्वदेवान्नेन देवतानैवेद्यं वैश्वदेवादिकं च कुर्यात्। इति पश्वादिकर्म। अत्रार्घ्यं किंचित् लिख्य
ते। सायमादि प्रातरंतमेकं कर्म प्रचक्षते। पौर्णमास्यादि दर्शांतमेकमेव विदुर्बुधाः। इति वचनात्। कृष्णपक्षे
यदाधानं तदा दर्शमनिष्ट्वैव पूर्णमास्यां पश्वादिकर्मारंभः। यत्तु छंदोगपरिशिष्टवचनं। ऊर्ध्वं पूर्णाहुतेर्दर्शपौ
र्णमासोपि चाग्रिमः। य आयाति स होतव्यः स एवादिरिति श्रुतेः। तत्तु न एकान्नं विषयं। तच्छाखिविषयं वा। तथा। एम
नात्र दर्शांतं पौर्णमासांतं इति वचनमादरणीयं कृत्वा स्मृतेर्वाधादिति। तत्र मुख्यकालातिक्रमे। पौर्णमासात्यये २९

हव्यं होतावायदहर्भवेत्। तदहर्न्नु कुर्यादेवममावास्यायां येष्टियं तथा पक्षादिहोमे त्वकृते प्रायश्चित्तादनंतरं। कुर्यात्तं
पक्षमध्यस्थ दिने येकत्रचित्। इत्यादिवचनैर्मध्येप्यनादेशपूर्वकं कर्त्तव्यं। मौख्यकालातिक्रमेऽग्रयणे पथि कृते च
रु। एवं स्वयमशक्तौऽन्येन करणीयं दैवादात्मवशाद्वा प्रतिबंधात्। पौर्णमासिकपक्षादि कर्मासंभवदर्शिकप
क्षादिकर्मणः पूर्वकस्मिंश्चिद्दिने अनादिष्टं कृत्वा कार्यं। तत्राप्यसंभवे लोपः। लोपे अनादिष्टं। उपवासः प्राय
श्चित्तं। संलग्नपक्षादित्रयलोपे पुनराधानं। एते पक्षादिकर्माणि स्वतंत्रो अनयोरालंभापवर्गलक्षणः संबंधो
नास्ति। आधानानंतरं यातु प्राप्यते प्रतिपत्तिथिः शुक्लावायसिता तस्यां प्रातर्होमे कृते सति स्थालीपाकः का
र्यः। अथ पिंडपितृयज्ञः। स च श्रौतेष्वनाहिताग्नेरप्येषः इति वचनादौपासनिकस्यापि भवति। प्रमीतपितृक
स्यैव कृतां वसथिकस्य भवति। तत्र प्रथमप्रयोगे पिंडपितृयज्ञनिमित्तं मातृपूजनपूर्वकं नांदीश्राद्धं कर्त्तव्य
मिति केचिद्वदंति। नश्राद्धं श्राद्धमिष्यत इति वचनात् नमातृपूजनं नांदीश्राद्धं कार्यं। अथ पिंडपितृयज्ञक्रमः।
तत्रामावास्यायां श्राद्धार्थपाकं कृत्वा। अपराह्णे निर्णेजनांतं वैश्वदेवं कृत्वा प्राणानायम्य देशकालौ संकी

र्म। अग्नेरुत्तरतः दक्षिणाभिमुखो पविश्य पसव्यं कृत्वा नीविं बध्वा श्री परमेश्वरप्रीत्यर्थं पितृपितृयज्ञमहं क
३० रिष्ये। ततः नैर्ऋतीमारभ्य अप्रादक्षिण्येन। दर्भैरग्नेः परिस्तरणं। ततः अग्नेः पश्चाद्दक्षिणासंस्थं पात्रासाद
नं। कृष्णाजिनं। उलूखलं। मुसलं। शूर्पं। उदकं। चरुस्थालीं। आज्यं। मेक्षणं। स्फ्यं। उदकपात्रं। सकृदाच्छिन्नदर्भा
30 ः। तंडुलादिद्रव्यं। सूत्राणि। ऊर्णा वा। उत्तरे वयसि यजमानकृतलोमानि वा। ततः अग्नेरुत्तरतः कृष्णाजिनमास्ती
र्य। तस्योपरि उलूखलं निधाय। एकचित्रपूर्णास्थितान् तंडुलान् उलूखले निधाय। मुसलं गृहीत्वा तिष्ठ
न् दक्षिणामुखः त्रिवारं तूष्णीं अवहन्यात्। ततः उपविश्य उलूखलस्थान् तंडुलान् शूर्पे निक्षिप्य सकृत्
फलीकृत्य सारतंडुलान् चरुस्थाल्यां निक्षिप्य। आसादितोदकेन सकृत्प्रक्षाल्य। अपरिमितं उदकं
प्रक्षिप्य। चरुस्थालीं अग्नावधिश्रित्य। इषदपक्कं चरुं घृतेनाभिघार्य दक्षिणातः उद्वास्य पूर्वेणाग्निमुत्तर
त आनीय स्थापयेत्। ततः सव्यं जान्वाच्य मेक्षणेन चरुमवदाय ॐ अग्नये कव्यवाहनाय स्वाहा। अग्नये क एण
व्यवाहनाय इदं। इत्यग्निमध्ये। तद्दक्षिणतः। ॐ सोमाय पितृमते स्वाहा। सो० इदं। मेक्षणमाकुलितदक्षिणा ॐ

तः प्रक्षिप्य। अत्र संस्रवाभावः। ततः अग्नेर्दक्षिणतः पश्चाद्वा दक्षिणाभिमुखोपविश्य सव्यं जान्वाच्य। उपलि
प्य। स्फ्येन। ॐ अपहता असुरा रक्षांसि वेदिषदः। अनेन दक्षिणसंस्थां रेखामुल्लिख्य। उदकोपस्पर्शनं। त
तः ॐ ये रूपाणि-प्रणुदामस्मात्। इमं तेन रेखायाः दक्षिणत उल्मुकं निधाय। उदं-। ततः उदकपात्रेणं पि
तृतीर्थेन रेखायां मूलादारभ्यावनेजयति। अमुकसगोत्रास्मत्पितामहामुकशर्मन्नरुद्ररूपावनेनिक्ष्वेति रे
खामध्ये। अमुकसगोत्रास्मत्प्रपितामहामुकशर्मन्नादित्यरूपावनेनिक्ष्वेति रेखाग्रे। ततः सकृदाछिन्नानि
रेखायां दक्षिणाग्राणि आस्तीर्य। चरुशेषस्य पिंडत्रयं कृत्वावनेजनक्रमेण दद्यात्। तद्यथा। अमुकसगोत्रा
स्मत्पितः अमुकशर्मन् वसुरूप एतत्तेन्नं स्वधा नमः। अमुकसगोत्रायास्मत्पित्रे मुकशर्मणे वसुरूपायेदं न मम।
अमुकसगोत्रास्मत्पितामहामुकशर्मन् रुद्ररूप एतत्तेन्नं स्वधा नमः। अमुकसगोत्रास्मत्प्रपितामहामुकश
र्मन्नादित्यरूप एतत्तेन्नं स्वधा नमः। अमुकसगोत्रायास्मत्प्रपितामहायामुकशर्मणे आदित्यरूपायेदं न मम
ततः ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वं। इति मंत्रेण पित्ता यवांजलिपुटसहितमप्रादक्षिण्येन

उदङ्मुखः सन् स्थित्वा सं यथाशक्ति निरुध्य असुं मंध्यात्वा तथैव प्रदक्षिणमावृत्य दक्षिणामुखोपविश्य । ॐ अमीमदंत
३१ पितरो यथाभागमावृषायिषत इति मंत्रं जपित्वा । सव्यान् पिंडमूलेषु निक्षिपेत् । ततः अमुकसगोत्रास्मत्पितामुक
शर्मन् वसुरूप पिंड अत्र त्ववने निक्ष्वेति प्रथमपिंडमस्तके । अमुकसगोत्रास्मत्पितामहामुकशर्मन् रुद्ररूप पिं
31 ड अत्र त्ववनेनिक्ष्व । अमुकसगोत्रास्मत्प्रपितामहामुकशर्मन् आदित्यरूप पिंड अत्र त्ववनेनिक्ष्व । ततः नीवीं विस्र
स्य पिंडाग्रे निक्षिपेत् । ततः अंजलिं विधाय । नमस्करोति । ॐ नमो वः पितरः शुष्माय । नमो वः पितरस्तपसे । नमो
वः पितरो यज्जीवं तस्मै । नमो वः पितरो रसाय । नमो वः पितरो घोराय मन्यवे । स्वधायै वः पितरो नमः । ६ । इति पिंडउञ्ज
लिकरणं कृत्वा एतद्वः पितरो वासः । इति मंत्रेण प्रतिपिंडं सूत्रदानं गंधादिना पूजनं । ऊर्जं वहंतीः । अनेन उद
कसेकः । पुत्रकामा पत्नी मध्यमं पिंडं प्राश्नाति आधत्त इति मंत्रेण । ततः पिंडानुत्थाप्य स्थाल्यां निक्षिप्य अवघ्रा
य सकृदाछिन्नानि उल्मुकं च अग्नौ प्रक्षिप्य । ६ । सर्वं कृत्वाचम्याप स्पृष्ट्वा त्वेमासुष्का षट्दैवतं सपिंडं श्रा एम
द्धं कुर्यात् इति पिंडपितृयज्ञः । अथ पिंडपितृयज्ञस्य अमावास्यायां तदकरणे वैश्वानरश्चरुः प्रायश्चित्तं न ३२

गौणकालोत्तरैकरणं। अथ समस्य होमः। तत्र प्रजापतिः सायंप्रातस्तनौ होमावुभौ सायं समस्यतु। आपन्नो जुहु-
यात्तत्र समिदेकाथवा द्वयं। सायंहोमस्य मुख्यत्वान्तरीयं तंत्र मिष्यते। यतस्त्वाहुतीः कर्यात्तत्र द्वे सायमाहु-
ती द्वे प्रातराहुती सायंहोमे चैका समिद्यदि। समित्कृता द्वितीया चेत्साऽभवेत्प्रातराहुतौ। द्विः सायंहोमवन्म-
न्त्राद्विः प्रातर्होमवत्सुचा। उपस्थानं सकृत्कृत्वा शेषं प्रकृतिवत् भवेत्। तथा यावंतोत्र समस्यंते सर्वे साय
मुपक्रमाः प्रातःकालापवर्गाश्च नतु प्रातरुपक्रमा। अथ कालातिक्रमे। कात्यायनः। सायंहोमात्यये प्रात
र्जुहुयात्सायमाहुतिं। प्रातर्होमं ततः कुर्याद्देवमेवोत्तरो विधिः। प्रातराहुतेर्मुख्यकालात्क्रमे तु आसायमाहुते
ः प्रातराहुतीर्नाशेति। आपौर्णमास्याद्दर्श इति गौणकालविधानात्। तन्मध्ये शीघ्रं होतव्यमिति नचैतत्कौत
विषयं। भरणादेरेव गृह्यकारविषयवचनं चैतत्। इत्यादिनातपुरुदासेन उपासनहोमस्य कालीयाकर्पार्वणानुक
ल्पकालपरत्वेन कल्पसूत्राधिकरणौ ब्यवस्थापि होमास्तु पक्षहोमास्तथापरे। सायमाहुतिमाहूय ततदेवप्रा
तराहुतिः असामर्थ्ये भवेत्स्यर्यसावमग्नौ हितिष्ठति। जाबालिः। सायंप्रातर्होमयोरनुकल्पकालस्याप्यतिक्र

३२ मेपुनराधानं। होमद्वयात्समेइतिपूर्वोक्तवचनात्। यदितुहोमलोपेऽनश्नन्कालंनयेत्। तथा। आहूयमाने
अश्नंश्चेत्तनयेत्कालंसमाहितः॥ सपत्नीकोयथातत्रहूयतेतदिहोच्यते। आहुतीः परिसंख्यायत्नेनाहुत्वाहुतीः
32 सहृत्। मंत्रेणविधिवद्धुत्वाएवमेवापराण्यपि। इतिपरिशिष्टेकुर्यात्पुनराधानं। तत्प्रयोगेज्ञातव्यं। केचि
त्तुकस्मिंश्चिद्दिवसेआहुतीः परिसंख्याययहोमानुष्ठानंयुक्तमित्याहुः॥ अथपक्षहोमविधिः। तत्रमरीचिः। श
रीरापन्नभवेचत्रयत्राच्चगमनंतथा। तथान्यास्वपिचापत्सुपक्षहोमोविधीयते। मुख्यकालेयदावश्यंकर्म
कर्तुंनशक्यते। गौणकालेपिकर्तव्यंगौणोप्यत्रादृशोभवेत्। अप्यनुकेऽस्थितदुक्तं। श्रौतामार्गावामात्तेपिपक्षहोमवि
धिंन्यायसाम्यात्प्रायदिस्मार्ताग्नावपिभवति। तत्रभरद्वाजसूत्रं। यावावराहवैपुनर्गमआसुत्तेच्वन्यआम्यंत
तेमखास्यामार्द्रमासायाग्निहोत्रमजुहुवरितितथा। सायमाहुतिरापातरासायंप्रातराहुतिः कर्तव्यंता
तियद्येतपार्वणांतरं। श्यामाकैर्व्रीहिभिश्चैवयवैरन्योन्यकालतः। प्राग्पूर्वंतुल्यंतेवश्यंसर्वत्राग्रयणास्मयः। ए एम
वमागामिकार्यस्यमुख्यकालादधस्तनः। स्वकालादुत्तरोगौणकालः पूर्वस्यकर्मणः। सर्वत्रगौणकालेषु ३२

कर्मचोदितमाचरेत्। प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म समाचरेत्। मुख्यकाले हि गौणं चेत् साधनं नैव लभ्यते। मुख्य
कालं तु पाश्रेयो गौणमप्यस्य साधनं। न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणं। एकपक्षगतो यावान् होमसं
घो निपद्यते। पक्षहोमविधानात्तु हुत्वा तं तु मतीयं त्रेत्। स्वकालोत्कर्षतः कश्चित् गौणकालो निरूपितः। अ
पकर्षाद् यथान्योऽपि गौणकालो निरूप्यते। आपदुत्तो वा यागतो तथैवामयसंयुतः। राष्ट्रभ्रंशे यथवाभावे गुन्नगे
हे वसन्नपि। अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च। समासमग्निहोत्राणां यथासंभवमाचरेत्। पक्षहोमान
शेषांश्च शेषहोमान् यथापि वा। समस्तं जुहुयान्नित्य प्रयोगोऽयं निरूप्यते। प्रतिपद्यं नयेत्सायंमापद्यन्यत्रवादि
ने। सायं सौपवसथ्याहार्याद्विनाभिमवंति वै। तां वंति परिसंगृह्य चतुरुन्नयनानि च। पात्रांतरसहायानि
त्यायां प्रकृतौ ष्ककिः। स्थूलं स्रुगंतरं वापि कृत्वा तत्र समुन्नयेत्। चतुर्दश चतुर्थ्यास्तः सकृदुन्नयनं ततः। एका
समित्सकृद्धोमः सकृदेव निमार्जनं। उपस्थानं सकृत्कार्यं शेषा प्रकृतिरिष्यते। एवमेवोत्तरत्रापि प्रातर्हो
मान् समस्यत। जुहोत्यौपवसथ्याहात् प्रातर्होमावधीन्सकृत्। समारोपविधानेन समारोपयेत् तेन लाञ्। एवं

३३ प्रतिपदोन्यत्र यत्रापउपक्रामते। तत्रचोपवसथ्यात्प्राकृमयत्रयापद्विनश्यति। आपदेवावधिर्होमसमासस्यास्तु
पेयते। तस्मात्कदाचिदारम्भयावंतस्तावतोपि वा। आपत्कालगमान्होमान समस्येदेकपक्षगान्। एवमेकत्र
33 पक्षेये होमास्तेषामशीघतः। न्यूनानां वासमासस्यान्यपक्षोत्तरवर्त्तिनः। सर्वदोपवसथ्यादौ सायंहोमः पृथक्भ
वेत्। तदेवयजनीयाद्ध्रुआतर्होमोभवेत्पृथक्। पर्वोपवासशब्दंतप्राप्तं केनापि हेतुना सायंतत्रतदा होमः पूर्वै
:सहसमस्यते। तावतानयगच्छेत्स्वेदापमस्तूतंतरेतिपिच। पुनः स्तत्रापि कर्त्तव्यः समासः। यथागेवहि। न तु पक्षांत
रस्थानां समासश्चोच्यते मिथः। एवमापतगतः पक्षे पक्षेचैवं समाचरेत्। तृतीयेनंतरे पक्षे समासं न समाच
रेत्। आपच्चेदनुवर्त्तेत दीर्घकालं कथंचन। याज्ञीवमविच्छिन्नान् पक्षहोमान्समाचरेत्। आपदेवावधिस्तत्र
जपक्षगणनावधिः। शरीरापतमेव यत्रमयाद्वार्त्तिः प्रजायते। तथान्यास्वपि चापत्सुपक्षहोमो विधियते। सरी
चिः। पक्षहोमानथोत्कृत्वामतस्मान्निवर्त्तितः। होमं पुनः प्रकुर्यात्तुनवासौदोषभाक्भवेत्। पक्षहोमकृते मध्ये एप
वेदापन्निवृत्तिः तस्यद्भूतिरेवहोमः कर्त्तव्य इत्यर्थः। तदुक्तं पक्षहोमे कृते पश्चान्निर्वोधस्तु यदाभवेत्। तत्त ३३

ऊर्द्ध्वं तद्धोतव्यं शेषाहेतत्तु यथाविधीति। संग्रहे। कालातीतेषु होमेषु उत्तरत्रागतेषु च। कालातीतां स्तु हुत्वैव उत्तरां
श्च समापयेत्। यः स्वतीतानतिक्रम्य कुर्यात्केवलमुत्तरान्। न देवा नैव च पितृन् हविस्तदुपतिष्ठते ऽ इति। इदं
पक्षहोमादिकं श्रौत एव होमविधिमायसाम्पादाय दिस्मार्तो ग्रावयिभवतीत्यर्थः। इति पक्षहोमः। अथ सम
स्य होमः। तत्र सायंकाल एव। प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं समासेन सायंप्रातरौपा
सनहोमं करिष्ये इति संकल्प्य। पर्युक्षणादि कृत्वा। ॐ अग्नये स्वाहा। अग्नये इदं। सूर्याय स्वाहा। सूर्याय इदं
० प्रजापतये स्वाहा। प्रजापतये इदं। विभूतिवंदनादि पूर्ववत्। इति समस्य होमः। अथ पक्षहोमः। तत्राध्वगम
ने यजमानस्य राष्ट्रभंगे धनाभावे गुरुगृहवासे अन्यास्वापत्सु पक्षहोमः। तत्रायं क्रमः। प्राणानायम्य देशका
लौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पक्षहोममहं करिष्ये। ततः उपमानादि पर्युक्ष्य। ततः एकस्मिन् पात्रे प्रतिपदि
सायंकाले आहुतिपरिमाणं होमद्रव्यं चतुर्दशवारं गृहीत्वा। ॐ अग्नये स्वाहा। अग्नये इदं०। पुनः स्तथैव च
तुर्दशवारं गृहीत्वा ॐ प्रजापतये स्वाहा। प्रजापतये इदं। एवमेव प्रातःकाले द्रव्यं गृहीत्वा ॐ सूर्याय स्वाहा

सू॰। तथैव चतुर्दशवारं गृहीत्वा प्रजापतये स्वाहा। प्र॰। शेषं पूर्ववत्। ततो दक्षिणेन पाणिना प्रागग्रमुत्तरारणिं गृही
३५ त्वा सव्येनाधरारणिमग्रे रूपरि धारयन्। अयं ते योनिरिति मंत्रेणाग्निं समारोप्यारणिं धारयेत्। इति पक्षहोमः॥
34 अथ पौर्णमासं प्रातःकाले प्रातर्होमं कृत्वा पक्षादिकर्म कुर्यात्। आपदनुवृत्तौ सायंकाले पुनः पूर्वोक्तविधिना
होमं समस्य जुहुयात्। अग्निसमारोपं चावृत्तीयपक्षे आपदनुवृत्तौ तृतीयपक्षेपि होमसमासं कुर्यात् यावद्दी
र्वं न दुष्यतीत्यपरः पक्षः। प्रकारांतरं तु सायंकाले समिदाधानपर्युक्षणानंतरं चतुर्दशाहुतिपरिमाणस
त्व आपदो गुरुत्वं भवति तदा सायंहोमैरेव अनेन विधिना प्रातर्होमानां समासं कुर्यात्। एवं पक्षहोमसमा
से कृते। अन्तराले आयां निवृत्तिर्यदि तदा प्रत्यहं सायंप्रातर्होमावकृतानपि जुहुयात्। न चेति कवा स्वामिस
न्नि। एते च होमसमासाः सायमुपक्रमाः प्रातरपवर्गाः। आपद्विशेषे तु प्रातरुपक्रमः। पूर्वाह्णापरादिकाला
नपेक्षा अपि बोधव्याः। निमित्ते पतिते तिथिनियमोपि नास्ति तत्रापत्काले पुरस्काले नैव होमसमासोपक्रमो एन
युज्यते समारूढेग्नौ पंचयज्ञविधानं लौकिकाग्नौ कर्तव्यं। यथा हृपक्षहोमे कृतवत्यग्नौ समासोपक्रमहूटे कथं ३४

चनात्पंचयज्ञविधानंवलौकिकेग्नौविधीयते॥ इति॥ यथापक्षहोमेकृतेयज्ञाग्निर्विच्छिन्नःस्याद्यथाभवेत्॥ ततऊर्ध्वंद्विहो
तव्यंशेषाहुतयथाविधि॥ इतिप्रतिष्ठानपुरवासिसिद्धभट्टसुतनृसिंहभट्टविरचितायांसंस्काररत्नावल्यांसम
स्तहोमपक्षहोमविधिः अथनवान्नप्राशनेकिंचिल्लिख्यते॥ यदिनवान्नप्राशनंकेनचित्कारणेनस्वकालेनकृत
तदाऽऽग्रोयेपिकुर्यात्॥ तथाचव्रीह्याग्रयणंशरदिचेन्नभवति तदायवाग्रयणात्पुराऽन्नादिष्टंकृत्वाकुर्यात्॥ तथा
यवाग्रयणमपिवसंतेचेन्नंजातंतदाव्रीह्याग्रयणात्पुरामयादिष्टंकृत्वाकुर्यात्॥ तत्राप्युक्तंतच्चेल्लोपएव॥ तदाएक
स्मिन्नुत्पन्नेउपवासोऽनादिष्टपूर्वं॥ आग्रयणद्वयस्यलोपेऽग्नयेतंतुमतेचरुःकार्यः॥ आग्रयणात्पूर्वंनूतनधा
न्यमात्रस्यमद्धाव्रीह्याग्रयणात्पूर्वंव्रीहीणांयवाग्रयणात्पूर्वंयवानामग्नौपचनंभोजनंचनिषिद्धं॥ यदिविस्मृत्या
क्रियतेतदाऽग्नयेवैश्वानरायचरुःकार्योनादिष्टपूर्वं॥ तथाचाश्वलायनः॥ अकृताग्रयणोश्नीयान्नवान्नंयदिस्मा
र्त्तिकः॥ वैश्वानरायकर्तव्यश्चरुःपूर्णापूर्णाहुतिस्तथा॥ आज्यंद्वादशकृत्वःस्रुग्गृहीत्वापूरयेत्स्रुचं॥ तस्याश्चाप्याहुति
र्यासासापूर्णाहुतिरुच्यते॥ स्रुवपूर्णाहुतिर्यास्यादितिकेचाद्विकाविदुः॥ पार्वणेनतंत्रेणचरुश्चवैश्वानरो

34 भवेदिति॥ पक्वादि कर्मसदृशं वैश्वानरकर्म। इयांस्तु विशेषः। वैश्वदेवान्ताभावः। आघारावाज्यभागानंतरं अग्नये वैश्वा
नराय स्वाहेति स्थालीपाकाहुतिस्तेनैव स्विष्टकृत्। इतरत्समानं। इति वैश्वानरचरुप्रयोगः। तथा शरदि नूतनव्रीह्य
35 भावे नूतनशालिभिर्नवान्नप्राशनं कार्यं। वसंतेपि नूतनयवाभावे नूतनगोधूमैः कार्यमिति। तदुक्तं कारिकायां। य
वैर्वसंते यष्टव्यं व्रीहिभिः शरदीष्यते। श्यामाकैरथ वा ग्रीष्मकाले तु वेणुजैः। कृताकृतं वेणुयवैर्दर्शाग्रयणं बुधः। स
मानतंत्रे वा व्रीहिश्यामाकाग्रयणे उभे। कात्यायनमते नैके श्यामाकेष्टिं न कुर्वते। शरद्वसंतयोः केचिन्नवयज्ञं प्रचक्ष
ते। धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः। नानिष्ट्वा नवसस्येन पशुना वाग्निमान्द्विजः। नवान्नमद्यान्मांसं वा दी
र्घमायुर्जिजीविषुः। नवानेनानर्चितो ह्यस्य पशुहव्येन चाग्नयः। प्राणानेवात्तुमिच्छन्ति तस्मादाग्रयणं चरेत्। श्यामाकव्री
हिमाषांस्तु शारदाग्रयणात्पुरा। न भुंजीतेति विस्पष्टं यज्ञपार्श्वे निरूपितं। दत्वैवं ब्राह्मणेभ्यश्च कृत्वा वा वैश्वदेविकं
अन्यन्नवान्नमश्नीयादिति बौधायनस्मृतिः। अनिष्ट्वा नैव तानद्याद्दुर्भिक्षादौ तथापदि। श्यामाकवेणुयवेषु स्यादेव एम
तासोमसंस्थः। नवाशननिषेधो एवं दंपत्योरुभयोस्ततः। नवस्यापि व्यपेक्षत्वादस्मिन्न विधिरुच्यते। कियद्दूरं पुरा ३५

णत्वं नवत्वं किं यदंतिकं। तस्य नामवधिः। प्रौष्ठी पौर्णमासी प्रसिद्धा। तादृश्योर्हेमयोः पौर्णमास्योर्मध्ये यदुद्भवं धान्यं
तन्नवमित्याहुस्तत्कालाग्रयणं प्रति। तदेव च तत्पुराणं स्यादूर्ध्वमाग्रयणे पुनः। यदाग्रयणशास्त्रे तु — — नावश्यपेक्षु
णो। ये कालास्तेषु द्विरष्टास्ते न्योन्यावधयो मताः॥ प्रावृट्कालात्पूर्वपक्वं शारदाग्रयणे नवं। प्रत्यासन्नतरत्वाद्वा ख्व
यमेवावधिर्भवेत्। यस्मिन्नाग्रयणे कुर्यादृतौ तदवसंभवं। धान्यं तन्नवमित्याहुरर्वाक्पक्वपुराणतनं। एवं सति शर
त्कालमात्राग्रयणकारिणः। शारत्पक्वनवहेयमर्वाक्पक्वं पुराणतनं। स्मार्तमाग्रयणं कृत्वा तत्रैव चैकदा चेत्। यद्यादधी
ततत्र त्रौ श्रौतस्याग्रयणस्य वता। कालेतु वर्तमानोपि न श्रौताग्रयणं पुनः। स्मार्तेनाग्रयणेनैव सिद्धेर्यस्मिन्न्वाश
ने। सर्वथा व्रीह्यभावे तु शालस्तु पादानमिष्यते। इति। अथ शरद्वसंतयोराहिताग्नेर्नवान्नप्राशनविधिः। शरदि व्री
हिभिः कार्यं वसंते च यवैर्हि तत्। सर्वथा व्रीह्यलाभे तु शालस्तु पादानमिष्यते। यवानामप्यलाभे तु गोधूमानां परि
ग्रहः। तत्र नवान्नेवान्नप्राशनस्य नियमः। प्रत्यब्दकर्तव्यत्वेन संहृता। श्रावणादिसंस्कारवैलक्षण्यान्नमध्ये पा
रस्करेण कालक्रमानुरोधाच्छित्रि विन्तस्यापि नित्यापेक्षितत्वाद पक्वस्य प्रकीर्णकमध्ये विवेचनं क्रीयते। तत्र

नवप्राशनमिति कर्मनामधेयं स्यात्। हुत्वेतं नवं प्राश्यते नाहुत्वा। तेनैतदाग्रयणशब्दवाच्यं। शरद्वसंतयोर्वा चिरमाद्भव
३६ तः। नात्र पर्वकालनियम इति भाष्यकारः। तत्र नवसस्याधिकारस्तु श्यामाकव्रीहियवाः। श्रीतोयान्नानकृत्वैवमन्ये
षु नियमः स्मृतः। इक्षुमुद्गांस्तथा बिल्वान्मूलकानि तिलांस्तथा। अकृताग्रयणोऽश्नीयान्न ते पुष्टा हविर्गुणैः॥ भुंजी
त सर्वशाकानि तथैव हरितान्यपि। आददीत नवं शस्तं तत्राग्रयणः स्मृतः॥ केचित्तु। एषां तद्ग्रहणादग्रे देवान्न
स्तर्पयेत्त्वं। व्रीह्यादिचोदितं धान्यं तस्मादग्रयणं स्मृतं। तेनानिष्ट्वा यदन्यमग्नियं कोद्रवादि तदपि नाश्नीयान्नव
स्येति सामान्यनिर्देशात्। तथा च त्रिकांडमंडनः। श्यामाकान्वैणवान्व्रीहीन्यवानाग्रयणात्पुरा। न भुंजीतेति वि
स्पष्टं मतं पार्श्वेऽप्रकीर्तितं। इत्यैव ब्राह्मणोऽप्यकृत्वा वैश्वदेविकं। अन्यत्तु नवान्नमश्नीयादिति बौधायनोऽब्रवीत्
अकृत्वा चेदश्नीयान्नवं वैश्वानरं निर्वपेत्। यद्वा न क्रियते येन धान्येनाग्रयणक्रिया। नवं तदपि नाश्नीयाद्दीर्घमा
युर्जिजीविषुः। धान्यमात्रनिषेधोऽयं मंकोमसर्वोऽथवा भवेत्। केचिद्धान्यानि शाकानि मृष्टादीनि फलानि च। अनि एम
ष्ट्वाग्रयणेनापि काममेतानि भक्षयेत्। नवैव त्वन्नानि नाद्यादाग्रयणात्पुरा। व्रीहीन्श्यामाकनीवारान्यववेणुय ३६

वानपि । तिलमुद्गांश्च गोधूमान् कंगूनिति विवर्जयेत् । आत्मनि काममश्नीयादिति गार्ग्येण भाषितं । गार्ग्यः । यानि शस्या-
न्यानि भक्ष्याणि प्रोक्तानि समंततः । तान्यपक्वावस्थायां मश्नीयात्कामतः सुधीः । अपक्वधान्यस्योपलक्षणं
हरितायवाः । तथा । प्रावृट्कालात्परं पक्वं शरदाग्रयणे नवं । शरत्कालात्परं पक्वं वसंताग्रयणे नवं । ऊर्ध्वं वसं-
तान्निष्पन्नं प्रावृड्याग्रयणे नवं । प्रत्यासंनतरत्वाद्धा स्वयमेवावधिर्भवेत् । यस्मिन्नाग्रयणं कुर्यादितीतदर्शनसंभवं
धान्यं तं नवमित्याकुरवीक्षकं पुरातनं । यतन्मते वार्षकालाहृतमषष्टिकानां वार्षिकः षष्टिकोपरइति । हविष्यपरिगणि-
तत्वेपि शरदाग्रणे पुराणत्वात् अयोग्यत्वमापि प्रेतं । मनुः । व्रीहिः शारत्पक्वं धान्यं षष्टिकादीनि परिशिष्टभाष्यका-
रव्याख्यानं । न छारदमुक्तं षष्टिकादिविषयमिति तद्देवाविरोधात् ग्राह्यमिति ॥ अथ नवान्नप्राशनप्रयोगः । तत्र
शरदि वसंते चानाहिताग्नेर्भवति । शरदि व्रीहीणां । वसंते यवानां ॥ तत्र शुभे दिवसे अश्विन्यारोहिण्यां रेवत्यां मृ-
गे पुनर्वसौ । पुष्ये । हस्ते । चित्रोत्तरात्रये । श्रवणे धनिष्ठायां वा भवति रिक्तां विष्टिं व्यतीपातं वैधृतिं संक्रांतिं च व-
र्जयित्वा । गुरौ बुधे रवौ वा चंद्रानुकूले दिवसे कार्यं । तत्र प्रातर्होमं कृत्वाग्नेः पश्चात्प्राङ्मुख उपविश्य सपत्नीकः स

पवित्रकरो वैश्वदेवार्थं पाकं कृत्वा निर्लेजनांतं नित्यं कर्म कृत्वा प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं
३० नवान्नप्राशनमहं करिष्ये॥ इति संकल्प्य प्रथमप्रयोगेन वान्नप्राशननिमित्तं मातृपूजनपूर्वकं नांदीश्राद्धं करिष्ये
इति संकल्प्य मातृपूजनं नांदीश्राद्धं च कृत्वाग्नेः पश्चादुपविश्य। अग्रे दक्षिणतो ब्रह्मासनमास्तीर्य। इत्यारभ्य न
37 वं स्थालीपाकं श्रपयित्वा पर्युक्षणांतं कुर्यात्। ततः आज्येन। ॐ प्रजापतये स्वाहा। प्रजापतये०। इंद्राय०
इंद्रायदं०। अग्नये०। अग्न०। सोमाय०। सोमा०। ततः शतायुधायायेचत्वार इति मंत्रद्वयस्य। परमेष्ठी प्रजापतिरृषिः त्रि
ष्टुप्छंदः। तत्र प्रथमस्येंद्रो देवता। द्वितीयस्य सर्वे देवता। आज्यहोमे वि०। ॐ शतायुधाय शतवीर्याय शतोतये
भिमातिषाहे। शतं यो नः शरदो अजीजानींद्रो नेषदति दुरितानि विश्वा स्वाहा। इंद्रायेदं०। ॐ ये चत्वारः प्रथमो देव
यानां अंतरा द्यावापृथिवी वियंति। तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा। सर्वेभ्यो दे
वेभ्य इदं०। ततः स्थालीपाकमभिघार्य तिस्र आहुतीर्जुहोति। ॐ इंद्राग्निभ्यां स्वाहा। इंद्राग्निभ्यामिदं०। ॐ वि एन ३०
श्वेभ्यो देवेभ्यः स्वाहा। विश्वेभ्यो देवेभ्य इदं०। ॐ द्यावापृथिवीभ्यां स्वाहा। द्यावापृथिवीभ्यामिदं०। ततः आज्येन

।ॐ स्विष्टमग्ने इति मंत्रस्य। प्रजापतिऋषिः। त्रिष्टुप्छंदः। अग्निर्देवता। आज्यहोमे वि०। ॐ स्विष्टमग्ने अभितत्पृणीहि
विश्वांश्च देवः पृतनाऽअभिष्यक्‌। सुगंनु पंथां प्रदिशंन एहि ज्योतिष्मद्धेह्यजरंन आयुः स्वाहा। अग्नये इदं०। ततः
स्थालीपाकेन। ॐ अग्नये स्विष्टकृते स्वाहा। अग्नये स्विष्टकृते इदं० पुनः आज्येन। ॐ स्विष्टमग्ने अभि०। आयुः स्वाहा।
अग्नये इदं०। ततः ॐ भूः स्वाहा। अग्नये इदं०। भूर्वद्व्याघ्राहुतयः। आज्येन जुहुयात्‌। ततः संस्रव प्राशने मंत्रः। अ
ग्निः प्रथम इत्यस्य मंत्रस्य। परमेष्ठी प्रजापतिऋषिः। अनुष्टुप्छंदः। लिंगोक्तादेवता। नवान्नप्राशने वि०। ॐ अ
ग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः। भद्रान्नः श्रेयः समनैष्ट देवाः
त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितआविशस्व। शंतोकाय तनयाय तन्मे स्योनं। इति मंत्रेण प्राश्नोति
।यद्वा ॐ अन्नपतेन्नस्य नो देहीत्यनेन मंत्रेण वा।। यवान्नप्राशने मंत्रविशेषः। एतमुत्यमिति मंत्रस्य। प्रजा
पतिऋषिः जगतीछंदः। लिंगोक्तादेवता। यवप्राशने वि०। ॐ एतमुत्यं मधुना संयुतं यवं सरस्वत्या अधिवना धि
यच्च कृषुः। इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः। इति मंत्रेण प्राशनं। ततः ब्राह्मणे

३८ 38
वरदानं। पवित्रप्रतिपत्तिः प्रणीताविमोहः। शांतिवचनं। आपः शिवाः। अग्नेरलंकरणं। विसृतिवंदनं। नमस्का
रः। अस्यांगत्वेन ब्राह्मणं भोजयिष्ये इति संकल्प्य भोजयेत। मस्यस्मन्याचः। यांतु मातृगणा इति मातृः विसर्जये
त्॥ इति नवान्नप्राशनप्रयोगः॥ इदं प्रथमप्रयोगे एव। द्वितीयादौ नवान्नकर्मविधानानंतरं मध्याह्ने पंच
महायज्ञाः कर्त्तव्याः। अग्निमान् द्विजो नवान्नेनानिष्ट्वा नवान्नं नाद्यात्। दंपत्योर्नियमः। श्यामाकवेणवव्रीहि
यवादीनामाग्रयणात् पूर्वं न भुंजीत। अन्यं नवान्नं वैश्वदेवं कृत्वा ब्राह्मणेभ्यो दत्वाश्नीयात्। व्रीह्यंतराभेदेन शा ल्यु
पादानं। यवानामलाभे गोधूमानां परिग्रहः। प्रावृट्कालात् परं पक्वं शरदाग्रयणेन वा। शरत्कालात् परं
पक्वं वसंताग्रयणेन वा। तस्यानामवधी ज्येष्ठीपौर्णमासी प्रसिद्धितः। तादृशो हमयोः पौर्णमास्योर्मध्ये यदु
द्भवं धान्यं तत्तन्नवान्नमित्याहुस्तत्कालाग्रयणं प्रति॥ ततः परेण स्वार्थमग्नौ कृते परस्याग्नौ वा स्वयं कृतेपि तत्प
ज्ञाकरणे वैश्वदेववद्याकरणेन वा नवान्नेनानिष्ट्वा वैश्वानरश्चरुरनादिष्टं वा॥ ॥ पतितान्नादिभोजने चान्नादि एम
ष्टं श्रीकृष्णचरणद्वंद्वमाधाय हृदयांबुजे। सिद्धभट्टतनूजेन काशीपुरनिवासिना रचितः श्रीनृसिंहेन नवान्न ३८

प्राशनक्रमः॥ अथ एशोदिविविधानं॥ तत्र कात्यायनपरिशिष्टं॥ अथ केशांतादूर्ध्वम पत्नीकउत्सन्नाग्निरन
ग्निकोब्रह्मचारीप्रवासीवाग्रामादन्वग्निरिति अग्निमाहृत्य एष्टोदिवीतिप्रतिष्ठाप्य तत्सवितुस्तां० सवितुर्वि
श्वानिदेवसवितरितित्रिभिः प्रज्वाल्य समितमितिद्वाभ्यामुपस्थाय पुनस्त्वेतिसमिंधनं तत्र पूर्ववद्धुतैहों
मोत्र पाकं वैश्वदेवाग्निबलिहरणं पक्वाद्याग्रयणेष्टिं कृत्वान्न वृथापाकी भवति न वृथापाकमश्नीयादितिश्रु
तेः अतऊर्ध्वं आवसथ्यवत॥ अस्यार्थः। केशांतात् ऊर्ध्वं अपत्नीकउत्सन्नाग्निअनग्निकः। प्रवासी। ब्रह्म
चारीवा। हुत्यादीनां पंचमहायज्ञप्रकारः। अन्वग्निरषसामिति मंत्रेण ग्रामाग्नेः एाहरणं। ततः। परिसमूहना
दि पंचभूसंस्कृते देशे। ॐ एष्टोदिविति मंत्रेण तत्र संस्थापनं। ततः तत्सवितुः०।१। ॐ तां सवितुः।०२। ॐ
विश्वानि देवसवितः।०३ इति त्रिभिः सावित्रैर्मंत्रैः अग्नेः प्रज्वलनं। ततः समितईं संकल्पेथां०।१। ॐ संवां०।
इति मंत्राभ्यां अग्नेरुपस्थानं। ततः ॐ पुनस्त्वा०।१। अनेनमंत्रेण अग्नेः समिंधनं ततः तस्मिन्नग्नौ समित्पूर्व
कं अहुतहोमादिकं आवसथ्यवत कुर्यात्। अनेन विधिना यावज्जीवं अग्नेर्धारणं कर्त्तव्यम् ओपासनवरित्या

३८ द्धः शांतेऽनेन विधिनाऽऽहरणं। अत्र सायंप्रातर्होमौ श्रपाकं वैश्वदेवबलिहरणापिंडपितृयज्ञाद्याग्र
यणादि कर्त्तव्यं। केचित्तु श्रवणादिकर्मादेर्निषेधं वदंति। तेन न दृष्टापाकीभवेत्। शेषं आवसथ्यवत् इति॥
39 केचित्तु। उत्सन्नाग्निरिति यदि परिणयनं निवृत्तः तर्हि अस्मिन्नग्नौ सभिन्नपूर्वकर्मकृतहोमः। ततस्तत्र पाकं श्र
पयित्वा पंचमहायज्ञाः कार्याः। वैश्वदेवे विशेषः। ब्रह्मणे स्वाहेत्यारभ्य अनुमतये स्वाहेत्यनंतरं विश्वेभ्यो दे
वेभ्यः स्वाहा १ विश्वदेवेस्वाहेति होमः।३८। ततः पूर्ववत् बलिकर्म तेन अनेन विधिना यावज्जीवं कर्त्तव्यं॥
अथ केशांतादूर्ध्वं अपत्नीक इति यदि दारसंग्रहं न कुर्वीत ततस्तस्याग्न्यैवाग्नौ एषोर्द्धिविधिकारः। प्रका
रस्तु पूर्वोक्त एव। अथ यदि सपत्नीकस्यापि अग्नौपासनग्रहणोनिमित्तवशेन अधिकारो न भवति तस्यापि
पूर्वोक्त एव विधिरिति। एवं ब्रह्मचारिणोपि अग्निविच्छेदे पूर्वविधिना अग्न्याहरणादि प्रज्वलनांतं तस्मि
न्नग्नौ पाकनिवृत्तिरिति। अथ साग्निको यदि प्रवासे श्रपणं करोति तर्हि पूर्ववत् अग्न्याहरणादि प्रज्वल एम
नादि कृत्वा तत्र पाकं कृत्वा भोजनमिति। तस्य होमवैश्वदेवयोरभावः यावत्प्रवासमिति। केचित्तु ब्राह्मण ३८

दिग्हारदग्निमानीयतत्रोपरिकाष्ठं गोमयपिंडं वा धारयित्वा न ज्वालितां तं गृहीत्वा पूर्वमग्निं विहायतद्गृहीतं ह्या
नं। अथ तत्रारोपणमुपासनस्य हस्ते समिन्मुखे वा पतस्य पथ्येष्टं वायते यो निरीतद्वा स्मानमात्मन्यारोहयति
या ते अग्ने यज्ञिया तनूस्त्वारोहात्मानं। अतस्तत्त्वर्याद्वभूमि यज्ञियो यज्ञियां तनूमारोह दहे हि मे प्राणमारोहे
ति वा पथ्येष्टं मतारयेदुपावरोह जातवेदः पुनस्त्वा देवेभ्यो हव्यं वह तु प्रजानन्। आयुः प्रजानां रयिमस्मा
सु धेह्यरिष्टो दीदिहि नो दुरोणाद् इत्यवधाय परिस्तरणं कृत्वा ततोग्न्याहरणभोजनं। इति कात्यायनोक्त आरोप
णविधि॥ ॥अथाग्निलाभमनेनाप्युक्तरीयणविधिः सायं प्रातस्तु जुहुयाद्यावज्जीवं द्विजोत्तमः। भूर्लो
काधिपतिस्त्वग्निर्द्युलोकाधिपती रविः। प्रजापतिस्तु भयत्रतारुपासनदेवताः। पूजितामेन तेनेष्टं त्रैलो
क्यं सचराचरं। आग्निहीनस्तु यो विप्र शूद्र एव न संशयः। न दातव्यं न होतव्यमग्निहीन द्विजन्मनः। के
वित्तमस्य होमास्तुः केचिद्धोजन होमिनः। पक्षहोमास्तथा केचित् ज्वलहोमास्तथापरे। यथा कथंचि
त कर्तव्यं यथा होमो न हीयते॥ सायं चोपक्रमो ह्यस्य प्रातश्चैव समापनं। प्रातर्द्वादशनाड्यस्तु साय

४० स्मां नवनादिका ॥ होमकालद्वयं प्रादुष्कृतिर्ह्निकाहोमकर्मणि । प्राक्तत्यायमाद्कृतेः प्रातर्होमकानानतिक्रमः
प्राक्कृपौर्णमासाद्दर्शस्यप्राक्कृ दर्शादितरस्यतुसायंहोमस्तयदूर्ध्वंतदेवप्रातराद्कृतेः । उन्नमोग्निर्धृतः कुंडे
40 श्चाल्मारोयस्तमध्यमः समिदारोपितस्त्वंस्य इति पाञ्चिकसंमतिः । समिदारोपणोपसेज्वलितेलौकिकेनले
प्रत्यवरोहमन्त्रेण तत्राग्निमवरोपयेत् । समाहूढसमिंनाशेततराधेयमिष्यते ॥ अथधारणिसमारोपंवक्ष्या
मिनियतात्मनां । सायंप्रातश्च हुत्वाग्निंपाणावारोप्यततः जलेनिमज्य स्नानं स्त्रीगमनं अस्पर्शस्पर्शनं
दुष्टप्रतिग्रहं इत्यादिनियमान्कुर्यात् । ततः पाणावारोपणे कृते होमो यदि विच्छिद्यते तदा आसप्तमदि
नाद्दर्वाक् ऊर्ध्वं विच्छिद्यतेनलः ॥ इति । एकस्मिन्नौपासने जाते द्वितीयोत्र करोति वा । लौकिकमोनकार्यः । कृतश्चे
ततदा । मोधामेअस्य ० १ सकोधिसूरि २ इतिसमिद्वयेनतं मग्निंबोधयित्वाहो । अथस्मार्त्तप्रायश्चित्तानि लि राम
ख्यंते ॥ तत्रानादेशोपास्करः । कालातिक्रमे नियतवत्प्रायश्चित्तं अत्रभाष्यं । कालातिक्रमे श्रौतेषु नैमित्ति ५०
केषु यद्विहितं तदेवात्र भवति । यद्वा । विज्ञाते प्रतिमहाव्याहृतिभिः सर्वाभिः अनुत्तथाः ७ सर्वप्रायश्चित्तं चेति ।

स्तं। कालमतिक्रमादन्यत्रापि दोषे उत्पन्ने तदेव भवति। नैमित्तिकांतरानभिधानादिति। एतच्च ककर्काचार्यव्याख्या
नमनुसृत्य श्रौतवदेव प्रयोगं केचित् कल्पयंति। तथा यत्र व्याहृतिभिर्होमः प्रायश्चित्तार्थको भवेत्। चतस्रस्तवि
दे पात्री पाणिग्रहहोमवत्। तत्रायं क्रमः। आज्यस्थाली। कुशाः। स्रुवः। स्रुक्। आज्यं। समित्। इत्यासाद्य। आज्य
स्थाल्यामाज्यनिर्वापः। आज्याधिश्रयणं। प्रथमकुशैः स्रुक्स्रुवसंमार्जनं। आज्योद्वासनं। अपरकुशैराज्योत्प
वनं। आज्यावेक्षणं। स्रुवेण स्रुचि चतुर्गृहीतमाज्यं गृहीत्वा तदुपरि समिधं दत्वा तिष्ठन् तूष्णीमग्नौ समिधं प्रक्षि
प्योपविश्य। ॐ भूः स्वाहा। अग्नय इदं०। पुनश्चतुर्गृहीत्वा॥ ॐ भुवः स्वाहा। वायव इदं०। पुनः। चतुर्गृहीत्वा। ॐ स्वः
स्वाहा। सूर्याय इदं०। पुनः चतुर्गृहीत्वा। ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं०। ततः सकृद्गृहीतैः स्रुवा सर्व
प्रायश्चित्तहोमः। ॐ त्वन्नो अग्ने०। स त्वं०। अयाश्चाग्ने०। ये ते शतं०। उदुत्तमं०। इति प्रायश्चित्तं। वासुदेवस्तु। यस्य
कर्मणो यः काल उक्तः स तदतिक्रमे एतदनादिष्टमुच्यते। नात्र व्रतोपवेशनादि। किंतु पूर्णाहुतिवदाज्यं निरू
प्याधिश्रित्य कुशैः स्रुवं संमृज्योद्वास्योत्पूयावेक्ष्याग्नौ समिधमाधाय स्रुवेणैव सर्वा एता आहुतीर्जुहुयात्। अ

अस्मिन् कर्मापि याते एते देव प्रायश्चित्तानि स्यात्कु । तस्य स्मार्तेषु स्कन्दाहोमो नास्तीत्यपि प्रायः । अत्र प्राणो नाम स्य
४१ देवात्कालोऽसंकीर्ण श्रीपरमेश्वरप्रीत्यर्थं अन्यथाकरणे वाक नियमादिलोपे अनादिष्टं स्मार्तप्रायश्चित्तं हवनं क
रिष्ये इति संकल्प पूर्वोक्तं प्रायश्चित्तं कुर्यात् ॥ ॥ तथा । यज्ञां स कुरुते पापं पः क्लिगान्न प्रपद्यते । अथ योनि
41 हूतिं तस्य याकुर्वैश्वानरं हविः । तथा । कालातीतेषु सर्वेषु प्राप्तवत्स्व परेषु च । कालातीतानि कृत्वेन विदध्यादुत्त
राणि च । यज्ञादिः पितृयज्ञादि प्रमादादकृतं यदि । प्रायश्चित्तं ततो कृत्वा कर्तव्यं तद्दिनांतरे । लुप्ते कर्मणि सर्व
त्र प्रायश्चित्तं विधीयते । प्रायश्चित्ते कृते पश्चात् । नित्यं कर्म विधीयते । पिंडपितृयज्ञस्य त्वमावास्यामनुष्ठाने तत्प्रा
यश्चित्तं तेन वैश्वानरेष्टिरेव भवेति । न पिंडपितृयज्ञः । तत्र पारस्करः पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च । अनिष्ट्वा
नवयज्ञे च नवान्नप्राशने तथा । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् । कात्यायनः । अनिष्ट्वाग्रयणेन नवस्या
श्रीयामाति तस्य भोजने अविकोऽतिग्रहे । यस्याग्निभिरस्यायाजयेयुः । यो वा यजेत वैश्वानरं निर्वपेत्कृत्वा वासो राम
दद्गिणोति । स्तत्रं । कंदोग्ने । नखेग्रावन्यहोमः स्यान्नुस्कैकांसमिदाकुंति । स्वगर्भसन्निक्रिया यो हियावंना सोऽप्रजा ४१

तो। अग्निसामान्येन संभवेत्स नाम छेयादो होमे सर्वत्र लौकिकः। नहि पित्रा समानीतः पुत्रस्य भवति क्वचित्। यथाऽय
स्याग्रावन्य होमस्यात्स वैश्वानरदैवतं। चरुं निर्वर्त्य जुहुयात्सा प्रायश्चित्तिरियं स्मृता। यद्यग्निरग्निसामान्येन संभवे
दाहितः क्वचित्। तत्राग्नये विविचये जुहुयाच्च घृताहुतीं। अग्नये प्सुमते चैवं जुहुयाद्द्वैधुतेन च। अग्नये शुचये चै
वं जुहुयाच्चैव धानाग्निना। गृहदाहाग्निनाग्निस्त्वयष्टव्यः। सामवान् द्विजैर्दावाग्निना च संसर्गे हृदयं यदि नश्यते
द्विर्भूतो यदि संसृज्येत्तं सदृष्टमुपशामयेत्। असंसृष्टं जागरयेत्। गिरिशर्मैवमुक्तवान्। मरीचिः। अन्येन संस्कृ
ते वह्नौ पाकयज्ञैर्यजेत चेत्। वैश्वानरेण चरुणा तत्र होमो विधीयते। व्रजिनो व्रतन्तत्त्वोपे वाग्नये व्रतभृते चरुः।
तथा। सायंप्रातर्यदा होमद्वयलोपो भवेत्क्वचित्। पक्वादिकर्मलोपे वाग्नये पथिकृते चरुः। जाबालिः। आसा
दितानां पात्राणां भेदे स्याद्दाश्विनश्रुहः। आज्यं वा जुहुयात्ताभ्यां प्रायश्चित्तिरियं स्मृता। बैजवापः। पवित्रनाशे भे
देच प्रमादाद्दलिजां तथा। नित्याहुतिस्तु होतव्या व्याहृतिप्रणवेन च। मरीचिः। पूर्वस्यामाहुतौ वाह्नि हुतायां
सव्रजेत चेत्। द्वितीयामाहुतिं तत्र हिरण्यमभिदापयेत्। मैत्रायणिः। सायं होमे तथा प्रातर्यदि पत्नी न विद्यते

४२ कुर्याद्व्रातपतीमिष्टिमिति वेदविदो विदुः । अत्राग्नये व्रतपतये चरुः । तत्र श्रौत्रे ये पुरोडाशास्तेत्र स्मार्त्ते चरवः इत्युक्त-
त्वात् स्मार्त्ते चरुर्भवति ॥ अथ वैश्वानरविधिः ॥ ॥ तद्यथा । अमावास्यायां पौर्णमास्यां वा । अद्येत्याद्युक्त्वा श्रीपरमेश्व-
42 रप्रीत्यर्थं वैश्वानरचरुहोमं करिष्ये । ततः ॥ ॐ पुण्याहमिति त्रिरुक्त्वा ॥ तत्र ब्रह्मासनं । प्रणीताप्रणयनं ॥ परिस्त-
रणं । पूर्ववत्पात्रासादनं । चरुकरणाद्याज्यभागान्तं कृत्वा । ॐ अग्नये वैश्वानराय स्वाहा इति स्रुवेण चरोरेकाहुतिः
अग्नये वैश्वानरायेदं० । चरोरुत्तरार्धेन स्विष्टकृत् । ततः ॐ भूः स्वाहा होमादि नवाहुतयः । प्राशनं । मार्जनं । दक्षिणा-
दानं । अयमेव विधिः सर्वचरूणामनुष्ठेयः । घृताहुतिषु चरुवर्जमन्यत्सर्वं कर्तव्यं । विशेषस्तु भूरादिहोमानन्तरं स्वि-
ष्टकृद्धोमः । आक् महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरित्यादिवचनात् । इति प्रायश्चित्तविधिः । अथ सर्वसा-
धारणं किंचिदुच्यते । यत्र स्वस्कानस्कन्द एव आवसथ्याग्नौ कर्म क्रियते न तत्र पंचभूसंस्काराः । दक्षिणतो ब्रह्मासन-
मास्तीर्येत्यारभ्य पर्युक्षणान्तं कुर्यादित्यन्तं सर्वहोमसाधारणं । अनुक्तकालानां कर्मणां उदगयनमापूर्यमाणपक्ष- राम
पुण्याहे अनुष्ठानं । सर्वत्र आघाराद्याज्यभागान्तेतरं अन्यहोमाः । अथातोधिकार इत्यारभ्य उपस्थ शेषपद इत्यन्तं प- ४२

यासंभवं कर्मस्वधिकृतं वेदितव्यं। तथा छंदोगपरिशिष्टे। देवतो नाविपर्यासे जुहोति पृथक् स्वयं भवेत्। सर्वप्रायश्चि-
त्तं कृत्वा क्रमशो ऽनुकुर्यात् पुनः। प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन। यतस्तदन्यथा भूतं तत एव समाप-
येत्। समाप्ते यदि जानीयात् दन्यथैतन्मया कृतं। तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः। प्रधानस्य क्रिया-
यां तु सांगं तत् क्रियते पुनः। तदंगस्याक्रियायां तु नावृत्तिर्नैव तत्क्रिया। तथा। होमपात्रमनादेशे द्रवद्रव्ये स्रुवः
स्मृतः। पाणिनैवेतरस्मिन्स्रुक्चात्र न दुह्यते। तथा। आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते। मंत्रस्य देवता या स्यात् प्रजा-
पतिरिति स्मृतिः। जाबालिः। दक्षिणायामनादेशे पूर्णपात्रं वरोऽथवा। कर्मस्वरूपमालोच्य प्रदेया दक्षिणा द्विजैः। मैत्रा-
यणिः। यथोक्तदक्षिणाभावे मूल्यानं वा फलानां वा दक्षिणां दद्यात्। दक्षिणायामनादेशे हिरण्यं। शौनकः। दक्षिणा-
यामनादेशे शालिं हिरण्यं वा दद्यात्। येन वा तुष्येदाचार्यः। व्यासः। ऋत्विजि प्रीतिमापन्ने सर्वास्तुष्यंति देवताः। दे-
वता स्वयं तुष्टास्तु सर्वः कामः प्रसिद्ध्यति। अश्रद्धया कृतं दत्तं सर्वं तत् प्रीति राक्षसाः। जाबालिः। हविष्यं व्रीहिभिर्यागो
यवैर्वापि विधीयते। तदभावे तु सामान्यात् कुर्यादिति विधिं बुधः। छंदोगो हविष्येषु यवामुख्याः तदनु व्रीहयः स्मृताः।

माषाकोद्रवगौरादीन्सर्वालाभेपिवर्जयेत्. यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारियत्॥ यवानामिवगोधूमाव्रीहि
४३ णामिवशालयः मत्रायणिः। आज्यार्थे घृतं। तदलाभे दधिपयसी। तदलाभे यवतंडुलयोः पिष्टान्यद्भिः संमथ्य आज्या
र्थानि कुर्वति। यज्ञपार्श्वः। घृतं वा यदि वा तैलं मेदो वा यदि वा वसा। आज्यस्थाने नियुक्तानां मा ज्यधर्मो विधीयते। निगम:
43 तैलं प्रतिनिधिं कुर्यात्तदा ज्यार्थयाज्ञिको यदि। प्रकृत्यैव तदा होता ब्रूयात् घृतवतीमिति। तथा। शम्यश्वत्थः। पलाशाश्च ख
दिरोथ विकंकतः। काश्मर्यौदुंबरो बिल्वो यज्ञवृक्षाः प्रकीर्तिताः। एषामभावे वृक्षाणामन्ये ग्राह्यास्तु याज्ञिकाः। वैज
वायः। अच्छिन्नाग्रान्तथा शुभ्रान्समुत्पन्नान्कोमलान्शुभान्। पितृदैवतयज्ञार्थं समादद्यात्कुशान्द्विजः। शुचि
र्भूत्वा शुचौ देशे छित्वा पूर्वोत्तरामुखः। हुंफट्कारेण मंत्रेण सकृत्सकृत् समुद्धरेत्। कुशोत्पाटनमंत्रो यं द्विजातीनां सदा
स्मृतः। ॐ विरिंचिना सहोत्पन्नाः परमेष्ठीनिसर्गतः। दह त पापानि सर्वाणि भव स्वस्तिकरो नमः स्वाहेति। कुशाभावे द्विज:
कर्मकाशैः कुर्वीत यत्नतः। तर्पणादिषु कार्येषु काशाः कुशसमाः स्मृताः। विष्णुः। कुशाभावे कुशस्थाने काशदूर्वादिद राम
द्यात्। कुंदोगं॥ अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। कात्यायनः। कुशौस ४३

मावप्रशीर्णाग्रो ऽनंतर्गर्भो कुशौः छिन्नत्तीति। अंगुष्ठांगुलिपर्वस्थैः पवित्रच्छेदनं कुशैः। न नखेन न काष्ठेन नायसे
न नमृण्मयैः। भवेत् नखेन कुनखी काष्ठे युः प्रणाशति। आयसाम्त्सुमाप्नोति मृण्मये न दरिद्रतां। मरीचीः। स्वयं
धौतेन कर्त्तव्या क्रिया! धर्म्या विपश्चिता॥ न निर्णेजकधौतेन नाहतेन कदाचन। ईषद्धौतं नवं श्वेतं सदशं य
न्नधारितं॥ अहतं तद्विजानीयात्सर्वकर्मसु पावनं। मनुः। उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः। सव्ये प्राचीनावीति
निवीती कंठसज्जने। बौधायनः। नाभेरधश्च संस्पर्शं कर्मयुक्तो विवर्जयेत्। मरीचिः। आनग्नः सम्यगाचांतः शुचिर्बद्ध
शिखो भवेत्। निधाय दक्षिणं बाहुं जान्वोरंतरे सदा। सोपसंग्रहो वाप्यतश्च कर्म कुर्वीत नान्यथा। जाबालिः। नग्नः स्या
न्मलवद्वासा नग्नः कौपीनकेवलः। द्विकच्छो ऽनुत्तरीयश्चाप्यकच्छो वस्त्र एव च। लघुहारीतः। एकवस्त्रो यदश्नी
यात् यज्जुहोति पददर्चति। सर्वं तदसुरान्गच्छेत् इत्याह भगवान्स्वयं। पैठीनसिः। अनुर्ध्वकृच्छमूढजानुर्जुड्यात्स
कलं हविः। नहि बाह्यकृतं देवाः प्रतिगृह्णंति कर्हिचित्। ऊर्ध्वजानुर्नीयमसस्पृशः। मूढे कुटिलीकृते जानुनीय
स्य सम्मूढजानुः। बाह्यकृतं जानुनोः बहिष्कृतेन पाणिना कृतं। जाबालीः। जान्वाच्य दक्षिणं मूमोदेवं कर्म समाच
रेत्। सव्यं जानु तथाचाच्य पित्र्यं कुर्वीत नान्यथा। परिशिष्टं। सदोपवीतिना भाव्यं सदा बद्धशिखेन च। विशिखो व्यु

पवीतिश्च यत्करोति न तत्कृतं। याज्ञवल्क्यः। यदि वाकृ यमलोप स्यात तज्जपादिषु कथंचनामाहरेत वैष्णवं मंत्रं स्मरेद्वा
४५ विष्णुमव्ययं॥ शुचिना कर्म कर्त्तव्यं नाशुद्धेनु कदाचन। तथा। प्राक्कदंचीनिकर्माणि कर्त्तव्यान्यन्यथा नेवासकः॥
सोपग्रहः कार्यो दक्षिणः सपवित्रकइति॥ अथ स्मार्त्तपुनराधानपुनराधेयनिमित्तानि। तत्र बौधायनः। नोप
वासः प्रवासे स्यात्पत्नी धारयते व्रतं। अमावास्याद्वयाहूर्ध्वं पुनराधानमिष्यते। आत्रोपवासो ग्निसमीपेवासः। व्रत
मुपवासरूपं। मैत्रायणीयपरिशिष्टे। आरोप्याग्नीन् रणेपोः स्वानुदवस्येत्सहाग्निभिः। दृष्टोग्निर्यदि न स्येतथ्यमा
नः पुनः पुनश्चग्राम्यात्सीमांतरं गच्छेत्स च कोह व्यवाहनः। अहुतो वत्सरं तिष्ठेदुदकेन शमं गतः। चतुर्भिः कारणै
रेभिः पुनराधानमिष्यते। अहुतो वत्सर इति यजमानेनाहुत इत्यर्थः। तथा। यजमानश्च पत्नीच यद्येकोपि न वे
श्मनि। ज्वलंतमग्निमुत्सृज्य पुनराधानमिष्यते॥ शौनकः। अग्नावननुगते यत्र होमकालद्वयं व्रजेत्। उभयोर्वि
प्रवासे वा पुनरा० तथा॥ प्रोषिते तु यदा पत्नी यदि ग्रामांतरं व्रजेत्। होमकाले यदि प्राप्ता न स्वदोषेणायुज्यते
मनुः। विहायाग्निं सभार्यः श्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्ययेतस्य पुनराधानमर्हति। अरण्योः कूपनाशे राम
ग्निदाहे ग्निं समाहितं। पालयेदुपशांते स्मिन् पुनराधानमिष्यते॥ अरण्योरल्पमप्यंग्यावत्तिष्ठति पूर्वयोः। न ता ४५

वत् पुनराधानमन्यारण्यपोर्विधीयते ॥ उत्तरावायदिरुक्षीणानष्टावादैवकारणात् । अथवायाधततोमंथेतग्रादेशंपरि
शोषयेत् ॥ तथा । सूतकं मृतकं यस्य यस्य भार्या रजस्वला । प्रवासगमने तस्य पुन० । स्पर्शेऽग्नेर्गृहदाहे च उदक्याया
स्तथैव च । उदक्यायां प्रवासाच्च पु० । तथा । ज्येष्ठा चेद्बहुभार्यस्य समभिचारेण गच्छति । पुनराधानराधानमत्रैके इच्छं
ति पुनस्तु गौतमः । पारस्करः । होमकालात्यये दर्शपौर्णमासात्ययेतथा । पुनरेवाग्निमादध्यादिति भार्गवशासनं । त
था । पितृयज्ञे च दीक्षायां पावकस्य मृतीषु च । एतेष्वेव वहेदग्निं असर्व्वं मनसापि वा । तथा । अनोविनासमारूढः शम्या
प्रासात्परे यदि । लौकिकेन समो ज्ञेयो नदी सत्र निदर्शनात् । तथा ॥ क्षुपांगारैस्तथादीपैः पावकः प्रशमेद्यदि । उक्तं
त्वाग्निः स विज्ञेयः पु० तथा । वकृया विहृतो ह्यग्निरावसथ्या कथं चन । यावदेकोपि तिष्ठेत तावदन्यो न मथ्यते । एष
ष्टोग्निर्यदि चांडालैरुदक्यादिभिरेव च । अन्येष्वप्युपपातेषु पुनस्येति सामिंधनं । तथा । अचोदितेन पाकेन कृतेनो
द्धरणेन च । लौकिकोग्निः स विज्ञेयः पु० ॥ छ ॥ तथा । प्रोषिते स्वामिनि वैदिकोग्निः ग्रामस्य सीमामतिलंघयेगच्छेत्
पत्न्याः प्रवासेपि तथैव नाशः पत्नीव कुलेपि समानमेतत् । अथ पुनराधाने विशेषः । तदेवारणिद्वयं तान्येव पा
त्राणि । तदुपघातेनावृत्तो वान्यानि कर्त्तव्यानि । मातृपूजानांदीश्राद्धस्य वाभावः । अग्न्येत्यापि युक्त्या पुनरावसथ्या

धानमहं करिष्ये इति विशेषसंकल्पः। अन्यत्सर्वं पूर्ववत् तत्र यथा। आद्यं नांदीमुखं केचित्पुनराधाने इच्छंति। कृतत्वात्पू
४५ र्वमेवास्य केचिन्नेच्छंति स्म स्पष्टं मरीचिः। भार्यामरणतोन्यत्र पुनराधानकर्मणि नाशे॥ अनाशे पूर्वारणिद्वयं ग्राह्यं
छंदोगैः। पूर्वैव योनिः पूर्वावत्पुनराधानकर्मणि। विशेषोत्राग्न्युपस्थानमात्रात् कुर्यात् वक्तं तथा। पूर्णाहुत्यादि
45 कं सर्वं अन्यत्पूर्ववदाचरेत्। पूर्णाहुत्यादिकं छंदोगविषयमिति तथा। संध्यावदन्यदाप्यग्नीन् हित्वा चेद्दंपती
गतौ। ग्रामांतं वान्यसीमांतं त्रैके ग्निशमं विदुः। अन्ये ग्रामांतरगमनात्तन्नत्वतिक्रममात्रतः सीमांनातिक्रमा
दन्ये केवलं नाशमब्रुवन्। नद्यादीभावव्यतिक्रम्य सीमां प्रत्यागतौ पुनः। उदयास्तमयात्पूर्वं न नाशोत्रेति केचन
छंदोगपरिशिष्टे हि क्रमकालात्ययेन तु। सीमातिक्रांतयोर्नष्टेर्नोदयास्तमयादिति। आपद्यपि हि कष्टा
या विना पत्नीं न संतरेः सीमातिक्रमणे ग्नीनां न कथंचिदनुग्रहः। प्रत्यक्षेणानयन्नग्नीनुच्छ्वसेचेद्विनश्यतीम्पदि
वानुच्छ्वसन्न हत्वा निधायोच्छ्वसने पुनः। हरेदनुच्छ्वसन्नेवं नश्येत्रिर्हरणे नलः। शकटेनातिदूरं वा हरेदृश्यं यथारुचि
स्वांशे नैवाथवा शम्या पराससात प्राङ् नयेच्छ्वसन्। कर्मार्थहरणे ग्नीनां नानुच्छ्वासादि चोद्यते कृत्स्नं पुनराधा एम
नं पुनः परिणये सति। अग्न्याधेयमुख्ये तीह केचिदुद्वाहकर्मणि। लौगाक्ष्यादिनिबद्धत्वाद्धुतमन्येति केचन। तत्रो ४५

प्रवासिनीं कृत्वा पत्नी पूर्वाग्निहोत्रिणी। पुनः परिणयेदग्नीनामुक्तत्वादीदृशो विधिः॥ आरोप्याग्नीनरण्योस्तानुद्वसेत्तेष्टिहाग्नि
मिः। उद्वासनेष्टिं कृत्वाथ समारोप्य कृताशनं॥ कृत्वा ब्रह्मौदनाग्निं च ततश्चौपासनपावकं॥ ब्रह्मौदनादिकं सिद्धं कृत्वाथ स
मारोप्य कृताशनं। कृत्वा ब्रह्मौदनाग्निं च ततश्चौपासनपावकं॥ ब्रह्मौदनादिकं सिद्धं कृत्वा दद्याद्विधानतः। पवित्रेष्टिं त
तमतीं त्रयीदृष्टिं क्रमाद्यजेत। ऐन्द्राग्नेनैव पशुना यष्टव्यं केवलेन वा॥ अथ वा पुनराधानमेवात्रेष्टिं न चेतरत्। अविवाध्याऽ
दधते यद्वाधानमेवास्ति चेद्यथा॥ अथ पुनराधानश्लोकाः प्रसंगाल्लिख्यंते॥ तथा। अग्निहोत्रेण रहितः पंथानं शनयो
जनं। आहिताग्निः प्रयायाद्वेदग्निहोत्रं विना त्र्यहाति। अर्धस्वयं मनुद्धृत्य घोहावयेदृत्विगादिना। तस्य स्यात्पुनराधेयं पवित्रेष्टि
रथापि वा। तथा। उपघातः क्रियालोपः उपेक्षा च प्रमादतः। चतुर्विधमिदं नराधेयं पवित्रेष्टिरथापि वा। तथा। उपघातः
क्रियालोपः उपेक्षा च प्रमादतः॥ चतुर्विधमिदं प्रोक्तं पुनराधानकारणं। प्रसिद्धः कर्मणां लोपः उपघातोस्त्यज्ञादिना
उपेक्षणं प्रवालादिप्रमादो ग्नेरधारणं॥ स्पृष्टोग्निर्यदि चांडालैरुदक्यादिभिरेव वा। उपघाते षु सर्वेषु पुनस्त्वेति समि
धनं। यजमानश्च पत्नी च उभौ प्रवसितौ यदि॥ आहोमान्न निवर्तेत पुनराधानमर्हति। यद्दोभाव्यतिक्रमप्सीमां प्रत्या
गतौ पुनः। होममकालमतिक्रम्य तदा नश्यंति वह्नयः॥ विनाग्निभिर्यदा पत्नी नदीयं शु[illegible]गामिनी। अतिक्रामेत्तदाग्नीनां विना

४६ नाशस्यादिति। क्रतिपत्न्यंतरेयथवा पत्नीकुलाशनसमीपगे। तदापत्नीयथाकाममतिक्रामेन्नदीमपि। पत्नीसीमामति
क्रांतायजमानो गृहे यदि। आहोमाद्यदिनाग्रच्छेत्पुनराधानमर्हति। एकाकिनी यदा पत्नी वह्नीनादाय गच्छति। तत्रनाशो
परेष्वाद्कुर्भयाघातेन दुष्यति। रजोदोषे समुत्पन्ने सूतके मृतके पि वा। प्रवसन्नग्निमाग्निमान्विप्रः पुनराधानमर्हति
वाह्नीनामपि चैकस्यामुदक्यायांतु न व्रजेत्। एकादशे चतुर्थे क्षिगंतुमिच्छेन्निमित्ततः। त्रयीसुक्तानुयोलोभात्प्रव
सेत्पर्वसंधिषु। करोति पुनराधानं प्रायश्चित्तमतावृतौ। नाग्निकार्यस्य वेलायांप्रवसेन्न च सर्वदा। न विना च नि
मित्तेन क्रीडाद्यर्थं तु न व्रजेत्। नदीसंतरणे ग्रीनां सीमातिक्रमणे तथा। सर्वत्राघं तसीम्नो वा स्वामी स्पृष्टः स्मरेत्
यः। प्रत्यक्षमरणिद्वारं वान्यथाग्निविनाशनं। आत्मारंभणपक्षे तु नान्वारंभणमिष्यते। तत्र नान्वारंभेदग्निं पुनराध
धिरूढा कृता। न काप्यारंभणं किंचित्सोमाग्न्यादिनिबंधनात्। उदक्या चेद्भवेत्पत्नी प्रसूता प्रवसत्यपि। अन्वारंभवि
कल्पत्वात्पुनराधिर्न तन्मतात्। ज्येष्ठा त्वारभतेवह्निं बहुभार्यस्य नेतरा। न चेत्सैकाकिनी पत्नी प्रयायादग्निभिः सह
रात्र्यंशोदिसंप्राप्ता वुचितं धानमीदृशं। अन्यथा हि प्रवसंत्यां वह्नयो लौकिकाः खलु। रात्र्यंशादिगमने प्राप्ते देशे
मनस्वती। जुहुयाद्व्रतं तेन स्मार्तेग्नौ सर्वसाद्धितं। साप्यं प्रातर्हुते नूर्वमेवं स्यात्क्रमनेच्व हं यत्तु गृह्याधेयमाल्यार्थं कृतवा राम ५

46

पत्नीविरहितो वह्निर्न यथाकामं स निर्हरेत्। होमद्वयात्यये दर्शपूर्णमासात्यये तथा। पुनरेवाग्निमादध्यादिति भार्गवशा
सनं। वह्नुधा विहृतो ह्यग्निरावसथ्यात्मकं च न। यावदेको पि तिष्ठेत तावदन्यो न नश्यते। वैश्वदेवान्नया होमात्स्यादाग्नेयं नै
वमंथनं। एकेनांतरितो वह्निरावसथ्यस्तु कथ्यते। आवसथ्यानु कर्मार्थं यो ग्निरुद्ध्रियते क्वचित्। पूर्वेण योजयित्वा तं
तस्मिन्होमो विधीयते चतुर्विंशतिमते॥ प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात्। शेषं महानसे कृत्वा तत्र पा
कं समाचरेत्। तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत्। ततोऽस्मिन्वैश्वदेवादि कर्म कुर्यादतंद्रितः॥ बह्वृचगृह्यकारि
कायां। नित्ययाकायशालाग्रेरेकदेशस्य कार्यतः। पाकार्थमुल्मुकं हृत्वा तत्र पक्वा महानसे। वैश्वदेवोग्न्यगारे स्या
त्पाकार्थोग्निश्च लौकिकः। भूरिपाको भवेद्यत्र आद्वारादुत्सवेषु च। हुत्वेपि वैश्वदेवेप लौकिको नैव कार्यतः। होमेनां
तरितं केचिदाहुः सर्वत्र लौकिकं। न तत्समंजसं तेषामुपपद्य होमदर्शनात्। समामं चोल्मुकस्याद्य रग्न्यगारे महा
नसात्। पाकांते वैश्वदेवास्याकूनैतरप्युपपद्यते। आहृते ह्युल्मुके पाकः शास्त्रे दृश्यते यशौ। वचनादाहृतिः॥
सातु लौकिकस्तत्पर्वगतः। दीपको धूपकश्चैव ताप्यार्थं यश्च नीयते। सर्वैति लौकिकाज्ञेया स्तावन्मात्रापवर्गतः
पचनाग्नौ पचेदन्नं सूतके मृतकेपि वा। अपत्काल वसेद्राग्निं पुनराधानमर्हति। अरण्यपोद्धृत्ययोर्वापि नष्टयोः

त्नीं गमोस्तथा। आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत्। अरण्योरंत्यमथ्यं गंधो वन्हिष्ठति पूर्वयोः। न तावत्पुनराधान
४७ मन्यारण्योर्विधीयते। पूर्वैर्वयोऽग्निः पूर्वावृत्पुनराधानकर्मणि। एकाकिनी यदा पत्नी कदाचिद्ग्राममाव्रजेत्ता हो
मकालेऽपि संप्राप्ते नस्यादोषेण युज्यते। अथ तत्रैव निवसेद्ग्रामं गत्वा प्रमादतः। लौकिकोऽग्निः स विज्ञेय दूत्येषाने
57 गमीश्रुतिः। भार्यायां प्रोषितायां चेदुदेशकालातिमेति वा। तत्रस्यापुनराधेयमन्येत्वा कुरिहान्यथा। पत्न्याः प्रवास
विषये पुनराधिरुदाहृतः। वाक्यैर्मनीषिभिः प्रोक्तैरेकभार्यस्य सेव्यते। बहुभार्यस्य ज्येष्ठा चेत्प्रवसेत्पुनराहृतिः। ज्ये
ष्ठा चेदग्निसंयुक्ता गच्छंत्यन्या यथा रुचि। यजमानेन सहिता यद्वा ता एव केवलाः। एकस्यामप्यतिष्ठंत्यामग्निहो
त्रसमीपतः। पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे जगुः। यदि सीमामतिक्रम्य रात्रौ तत्रैव वत्स्यति। अगृहस्य प्रया
णं यत्प्रवास उच्यते बुधैः। यत्तु नामयणे नोक्तं ग्रामात्स्वाग्निसमन्वितात्। त्वा ग्रामांतरे वासः प्रवासोयमितीदृशी
ग्रामांतरे नगर्यां वापत्न्यां वान्यत्र वा क्वचित्। सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतं। प्रवसेद्धृन संपत्नीनती
र्थाय कदाचन। इति कूर्मपुराणोक्तं तथा गौद्धायनेन च॥ सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि मानवः। पुराण राम
वचनात्स्वाग्नेः प्रवासोस्तीति केचन। न कुर्युर्नग्नुपस्थानं प्रवत्स्यंतोपियोषितः। त्यागान्नप्रोषिताः कुर्युरग्नेस्ते ४७

वसथ्यर्थकं। आगतो पश्चिमितं चापि स्त्रीणां नेच्छन्ति सूतरयः। समूहस्य प्रकारं यत्रेत्यत्राग्निसमन्विताः क्वचिच्छ्वेतास्य हृत्यर्थम्
नसाः सहगच्छति। अनस्यारोपयेदग्नीन् स्वात्मन्यात्मन्येव पितत्र च। स्वांगेन वा नयेदग्निं कात्यायनमतादपि नयेद्वा ब्राह्मणस्त्वन्नी
न्नयेन सहगच्छति। प्रमत्ते रुणे नयत्राग्निमुच्छुसे चेद्विनश्यति। यदि वानुच्छुसन्मत्वा निधायोच्छुस्यतं पुनः हरेदनुच्छुसन्नै
वं न श्येदग्निर्हरणेनलः। प्रकटेनातिदूरं वा दूरे देशं यथारुचि। स्वांगे नैवाथवा शम्यापरासात्म्याद्दूर्ध्येच्छुसन्। कर्मार्थंह
रणेग्नीनां नानुच्छूसादि चोद्यते। कात्यायनमताकेचिच्छुसंतोप्यतिदूरतः। प्रमत्ते रुणेन यत्राग्नीन् शकटेन विनापि तु।
आधानावसरे जाते यथाधात्तरूपद्रवः। अवृद्धिर्नाम सा प्रोक्तात्र स्यात्पुनराहितिः। उद्धातेग्नौ विहारात्स्यात्मथ्यमा
नेप्य जन्मनि। लौकिकाग्रावनिक्षिप्तेभ्युदये स्तमये पि वा। विनष्टे हेतुनानेन ज्ञाते वेदा विनश्यति। विहारोत्तरकालं वा
नष्टे पूर्वापरानलौ। शेषं पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति। कालात्यत्वे तु निर्मथ्य लौकाग्न्यादि दिक्षिपेद्यदि। उ
दयास्तयामत्पूर्वकर्कोत्रीनाशमिच्छति। लौकाग्न्यादावलब्धेपि पुराकीस्तमयोदयात्। मंथनारंभमात्रेणनाशो
वृद्धैर्निवारितः। उभयोर्नाशविज्ञानादूर्ध्वमर्कोस्तमेतिचेत्। कर्कोग्निनाशमाचष्टे पश्चाज्ज्ञातेपि नेच्छति। एकयोर्नि
त्यपक्षे तु सर्वाग्न्यनुगमोयमुदयास्तमयेतत्र नाशमेकेन हूमयोः। अथ चेदुभयोर्द्धातेभ्युदयास्तमयात्पुरा। परोग्निं

४८ रेकोऽजातश्चेन्नावतापिनमश्नाति। तदनुत्पत्तिमात्रेणस्यादग्न्याधिर्नपूर्वयोः। मंत्रंविनासमारूढोरणेरात्मनि
वायदि। तत्रज्वलनशांतौस्यादसमारूढशांतिवत्। आरूढोपियथाशास्त्रमवरूढोनशास्त्रतः। त्वतीयेहोमका
लेथसंप्राप्तेपुनराहितिः। यदात्तुलौकिकाग्न्यादिनिधायहवनंतदा॥ कृतेपिलौकिकाग्न्यादौमथ्यमानोप्य
48 नंपरं। द्वितीयाद्यात्तृतीयाद्याहोमकालात्पुरायदि॥ अग्निर्नजायतेतत्रपुनराधेयमाचरेत्। कृतेषुपञ्चहो
मेषुपञ्चत्वंयमनंतंरं। कर्तव्यंपुनराधेयंमथ्यमानोकृताशनः। दृष्टमात्रोनुगच्छेत्तत्रतस्यविनाशनं। शान्तशो
नुगमेचान्येपुनर्निर्मथ्यजन्यते। नष्टेमथितमात्रेवासमारोपयजुर्जपेत्। पुनर्निर्मथ्यजन्मत्वंयजुःस्वरूपावरोहणं
जलेनहेतुनावाह्निरुपशांतोयदाभवेत्। कर्तव्यंपुनराधेयंतत्पार्श्वेनिरूपितं। तदेवपुनराधेयमग्न्यावनुगतेस
ति। अस्मादायचेत्स्वामीसीमामुल्लंघ्यगच्छति। मूकरासभकाकमृगालैःकुक्कुरकुक्कुटमर्कटशूद्रैः। अन्त्य
जपातकिभिःकुणपैर्वास्पृतिकयापिरजस्वलयावा। रेतोमूत्रपुरीषैर्वापूयाश्रुश्लेष्मशोणितैः। दुष्टास्थिमां
समज्जानिरन्यैर्वातिजुगुप्सितैः। आरोपितारणीस्पर्शेकृतेग्नौस्पर्शनेपिवा। आत्मारूढेषुमन्त्रेषुद्रावदेहपतिता एम
दिभिः। अथवामोषितंगच्छेदन्तौकाममोहितः। वदंत्येषुनिमित्तेषुकेचिदग्निविनाशनं। तत्रारणीगतेवह्नौन ४८

नष्टेस्मात्पुनराहितिः। इतरेषु निमित्तेष्वग्न्याधेयं प्रवक्ष्यते। महासर्वोपहघातेषु पुनस्त्वेतिसमिंधनं। द्रव्यस्तेयाद्युपघातेषु द्र
व्यशुद्धिः समिंधने। समिंधनं च पुनस्त्वा रुद्रा इति मंत्रेण। समिद्धस्याप्यग्नेः पुनरिंधनं प्रक्षेपेण प्रदीप्ततरकरणं। आरोपि
तारणी चोभे एकाकायादि नश्यति। तत्राग्न्याधेयमिच्छंति पुनराधेयमेव वा॥ इत्यनारोपितोरण्योः क्षयेग्न्याहोने चेत्पुन।
नदत्तामैयदेहोद्यान्निदास्यात्पुनराहितिं॥ स्पृष्टोदत्वांत्यकाकैश्वपतितामेध्यरासभैः। अनाहूतारणिस्पर्शेतिवि
हाय्यान्ययोर्ग्रहः। लवतंनः समेत्यमप्सु मज्जापेत दूषितारणी। एकारण्येचदुष्टाचेन्नामेवाप्सु निमज्जयेत्। तत्रान्यारणि
लाभात्प्रागुद्घाते पुनराहितिः। कोष्ठमृत्क्वाविशोध्येवाम्लजे दोषेतिसंतते। नष्ठ्याममरणौ मासावदग्निस्तिष्ठतिवेश्म
नि। तावद्धोमादिकं तत्र तन्नाशे पुनराहरेत्। प्रागादित्योदयाद्धोमं संकल्प्यन जुहोति चेत्। अग्न्याधिः पुनराधिर्वा
नोमयं स्वाम्यसन्निधौ। नाशाय हरावग्नीनां यद्यहूतारणोर्यदा। कुर्याच्च पुनराधेयमितिवौद्धायनोब्रवीत्। अ
न्यैतेषु निमित्तेषु वच्यानां पुनराहितिः। स्थितानुसंधानप्रधान्ये पुपुनराधानमिष्यते। अतोग्निहोत्रं निमेषिः पितयज्ञ
इतित्रयं। स्वामिनि प्रोषितेपमौनान्यत्वामिनि क्रियाग्निचितं। नैमित्तिकस्त्वज्ञातेष्टिर्हृदाहेष्टिपूर्वकाः। स्वाम्याग
मनपर्यंतमुक्तकष्टयाहृहोमता। अग्न्याधेयादिकं प्राप्तं सुमयानुगमनादिना। स्वाम्यागमनपर्यंतमुत्कष्टममसं

४८ शयं। मथित्वा पावकं सर्वं प्रायश्चित्तं विधाय च। मित्रायेत्यादिभिर्हुत्वा द्वादशानुगमाकृतिः। अग्निहोत्रं यथाका
लं नित्येष्टिं च समाचरेत्। आस्वाम्यागमनान्निर्दिष्टेदाग्न्याधादधीत सः। एवं केशववृत्तांतात् प्रोषितस्याग्निशुश्रि
याः। अवश्यंभाविनीमुक्त्वा धुनावक्ष्ये मतांतरं। काम्याः क्रिया न कर्त्तव्याः स्वामिनि प्रोषिते सति। नित्या नैमित्तिकी
49 कुर्यात्प्रवसत्यपि मर्त्तरि। तथापि नैव कर्त्तव्याः क्रियाः सोत्तरवेदिकाः। आधानपुनराधाने न स्तः यत्नौ प्रवासिनी
।उभवानुगमनादौ तु प्रायश्चित्ताघे यतः। पुरा न किंचिदग्निहोत्रादि कर्त्तव्यमिह दर्शने। रजोदोषे समुत्पन्ने सूत
के मृतकेपि वा। नित्यं नैमित्तिकं कुर्यात् काम्यं कर्म न किंचन। आधानं पुनराधानं पशुः सौत्रामणीस्तथा। चातु
र्मास्यानि सोमश्च तथैवाग्रयणक्रिया। अकाम्यत्वेपि नैतेषां सूतकादावनुष्ठितिः। अक्रांतेष्वपि चैतेषु सूतका
दिसमुद्भवे। कर्त्तव्यान्येव वैतानि वारितान्यथ शेषतः। जातो पिता विनाभस्मस्पर्शं जातजपं विना। प्रायश्चित्तं
विना काष्ठं मंथनेचोदितं विना। लौकिकः स्यादितो लुप्ताद्दाह्यावर्त्तयेत्पुनः। यदि नावर्त्तयेद्दग्धो तादृशेप्य
जुहोति च। क्रियमानेपि लुप्येत होमकालाष्टकात्परं। भस्मस्पर्शं विनाप्येके लौकिकत्वं न मन्यते। होमाष्टका राम
धिके लुप्तेध तोप्यग्निर्विनश्यति। अतोल्पहोमलोपेपि यद्युद्धाये हि न श्यति। आधान पुनराधाने हि विकल्प ४८

नात्र चोदिते। लुप्ते होमद्रव्ये आहुतौ गार्हिरनलाहितिं॥ ज्वलनवषग्निषु कर्त्तव्यतं तु मतस्येव केवला। आपद्यग्निषु दीप्य
त्सु मासार्द्धं चेन्न हूयते। सर्वहोमानतिक्रांत्यानां मसन्तानां तेषु कहोमवत्। समसस्यनुकुर्यात्समस्त्रादिष्टिस्त्वं तु मती भवेत्। नत
त्र पुनराधेयमिति कौषीतकी श्रुतेः। कारिका। वत्सरं वत्सरार्द्धं वा होमलोपे मतांतरं॥ आपत्कालेन नष्टे तिदीप्यंते
वेद्धुताशनः। पंच कार्याः पुरोडाशाहोमे लुप्ते द्वैवत्सरं। पथिकृत्सयमो ज्ञेयः पावकः शुचिरेव च। व्रतपतिस्तंतुमां
अग्निर्देवताया गुणाः क्रमात्। सप्त कुर्यात्पुरोडाशान्होमे लुप्तेनुवत्सरं। पावमानः पावकश्च शुचिः पथिकृदित्य
पि। वैश्वानरो व्रतपतिस्तंतुमानिति सप्तभिः। विशेषितोग्निरेव स्याद्देवता च यथाक्रमं। एकारंभपरं कृत्वा विच्छेदे
घविशेषतः। मनस्वती व्रतयुतां नाधानमनलेसति॥ इयमापत्सु घोरासु मिलितासु प्रयोज्यते। द्वादशाहाकु
तिच्छेदे कुर्युरन्ये मनस्वती। अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः। पालयेदुपशांतेस्मिन्पुनराधानमिष्य
ते। एकारण्यां विनष्टायामस्ति चेदुत्तरारणिः। तां छित्वा मंथनं प्रोक्तं भाष्ये वौधायनीयके। अरणीमंथनाश
क्तेजंतुभिर्मंथनेन वा। एतां चेदरणीं नूत्नेग्राह्येशाखोत्कलकरणे। श्रौमत्तेनुच्छिते दर्शे तस्मिन्जीर्णारणिद्व
यं। शकलीकृत्य पश्चात्सेव क्लौ निक्षिप्य दीपयेत्। ततो दक्षिणहस्तेन नूतनामुत्तरारणिं। गृहीत्वा सव्यहस्तेनग

ह्नीयादधरारणिं। ते उभे अरणी तत्र दीप्ते ऽग्नौ धारयन् जपेत्। उद्बुध्यस्वाग्न इत्येतदयं ते योनिरित्यपि। उद्बुध्यस्वाग्ने
५० प्रविश स्वयोनिमन्यां देवयज्यायै वोढवे जातवेदः॥ अरण्योरग्नी अनुसंक्रमय्य जीर्णां तनुमजीर्णया निर्णुदस्व
ति प्रथमो मंत्रः। मंथनस्याकृता समस्या स्थिताग्निर्विहृतः स च। विलाप्यो नूपदर्भाभ्यां स्रुच्यादाय च तद्घृतं। जुहोत्या
50 हवनीयेऽग्नौ मनस्वत्याघ्नतां तया। इष्टिं तंतुमतीं कुर्याद्धएवं दक्षिणां ददेत्। इत्सनारोपितारण्योः क्षयेग्राह
नवे पुनः। तदलाभे दौ यष्टापेत्र दास्याम्पुनराहितिः। कामे निमित्तयोगे वा पुनराधेयमिष्यते। निमित्ते पुष्पया
योगमाधानमपि वा भवेत्। तत्र ये तु निमित्ते तु मुख्यं गण्याहिकया विधिः। तत्रैव पुनराधेयमनन्याधानमिष्यते
। अन्यत्राप्यपरे प्राहुः पुनराधिं विकल्पतः। यद्वित्तं जीवनोपायं लब्धुं द्वा स्यैकवत्सरे। तन्नाशे पुत्रमत्यीयां ज्ञा
तीनामवरोधने अंगनाशे गना नाशे पुनराधानमिष्यते। उक्तो निः सर्वस्वहानिः स्यात्सर्वं माध्यंदिनश्रुते पु
नरानन्यानि कुर्वीत श्रद्दधानो विमत्सरः। न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन। इंद्रियाणि यशः स्वर्गमायुः
कीर्तिं प्रजापशून्। हंत्यल्पेन धनेनैव विप्रोऽमत्पधनो यजेत्॥ इति पुनराधानपुनराधेययोर्निमित्तानि॥ एप
श्रीकृष्णचरणद्वंद्वमाधाय हृदयांबुजे। मिद्धमदत्तनूजेन काशीपुनरनिवासिना। रचितं श्रीनृसिंहेन पुनरा ५:

धानविनिर्णयः। अथ साग्निकस्य प्रवासविधिः। तत्र छंदोगे। निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा। प्रवसेत् कार्यवा
न् विप्रो वृथैव न चिरं क्वचित्। मनसा नैत्यकं कर्म प्रवसन्नप्यतंद्रितः। उपविश्य शुचिः सर्वं यथाकालमुपाचरेत्। पत्नीं कृ
त्वं आह। पत्युरव्यवधियोगिन्या शुश्रूष्योऽग्निर्विनीतया। सौभाग्यवदवैधव्यकामया भर्तृभक्तया। बह्वृमार्यप्रत्याहा या
यो स्याच्चाह्नीरसूत्रसां मातृत्वासंपादिनी च या। दक्षः। अग्निं वदाशुद्धा तामत्र विनियोजयेत्। पुंश्चली कृतवर्गस्य पीडमा
नस्य शत्रुभिः। मासद्वयं प्रवासोऽस्ति परमेतोनाग्निमान् भवेत्। गार्ग्यः। नोपकसः प्रवासेस्यात् पत्नी धारयते व्रतं। पु
त्रो भ्राताथवा पत्नी शिष्यो वास्य बलिं हरेत्। औपासने समारोपो न स्यात् प्रवसतोऽपि च। कौषीतकिः। आपत्कनस
मर्थस्यादग्निपालयितं यदा। पक्षहोमं विधायाग्नेः समारोपः सदारणौ। अग्निमुद्धृत्य शकटे हृत्वा सम्यक् परि
क्षते। प्रवसेत् कार्यवान् विप्रो गृहे चैन्नास्तिरक्षकः। मैत्रायणीः। पितृमेधे वदीक्षायां यात्रायामवरंभतीषु चाप्ते तेष्वे
ववहे दग्निं प्रत्यहं मनसा विना। विधाय पक्षहोमान्वा समारोप्य यथाविधि। अरण्योरग्निमध्वान्तं अप घेता
पदि द्विजः। समारोपे कृते त्वग्नौ वैश्वदेवस्तु लौकिके। इति। धाध्यापनिः। साग्निरग्नौ समारूढे वैश्वदेवस्तु लौ
किके। कुर्वीताप्यथवा कुर्याद्। द्रोऽग्निरभवपतः। अन्वस्या च कुतीरप्सु जुहुयाद् यदपे वा। देवयज्ञो विधातव्यो

आकाङ्क्षाघनकेन चित। आथर्वणी। अश्रु दूदेशाक्रमणस्पर्शदोषादिसंभवात्। प्रसङ्गवहनादग्नेः समारोपे विशि
५१ ष्यते। जाबालिः समीध्या स्वयमरण्यो वा समारोपे यथाविधि। अयं ते योनिरित्येष मंत्रो वाजसनेयके। विष्णुः प्रोषि
तश्चाग्निहोत्रीय दाग्निहोत्रं कृतं मन्येत तदाग्रीयाद्वैश्वदेवं कृतं मन्येत दायाजमानं कुर्यादिति। परिशिष्टे प्रवसे
51 दाहिताग्निश्चेत्कदाचित्कालपर्ययात्। यस्मिन्न ग्रीष्मवेलाको वैश्वदेवस्तत्र वै। तत्राकृत्वा तद्यो भुंक्ते स भुंक्ते के
वलं त्वघः। इदं त्वसंताशक्य विषयमिति पूर्वोक्तं। आहिताग्नेः प्रवासे पाकनिषेधादिति।। अथ प्रवासविधिः
तत्रावसथ्यसमीपं गत्वा पत्नीमग्निसमर्पणं। होमार्थं ऋत्विक्कल्पनं। अग्निं प्रणम्य वा प्रतस्य गृहान्निः
क्रमणं। कियद्दूरं गत्वा वाग्विसर्गः। प्रोषितस्य यथाकालं होमादि ध्यानं। याजमानं वा। सायमग्नये इदं न मम
इ॰ इदं॰। प्रातः। सूर्याय इदं॰ प्र॰ इदं न॰। इति होमयाजमानं। वैश्वदेवपितृयज्ञपक्वादिकर्माणि याजमाना
नि यथाकालमनुष्ठेयानि। अकृतप्रवासधर्मस्य दैववशात् पुनरागमनाऽसामर्थ्ये। ॐ इह वैव संतत्र संतं त्वा
ग्नेऽप्राणेन वाचा मनसा बिभर्मि तिरो मा सन्तमायुर्मा हासीः प्रहासीज्ज्योतिषा त्वा वैश्वानरेणोपतिष्ठे। इत्युपस्थ एम
नं शाखांतरोक्तं कृत्वा याजमानं कर्तव्यमिति। अत्र वदंति। प्रोषिते यजमाने मन्त्रान्ते प्रत्येकं समकालं तेनस्य ५१

क्रमशक्तत्वात्पत्न्यैवत्यागः कर्तव्यः। स्वामिनाऽननुमतिमात्रं कर्तव्यं। यत्तु प्रवसन् याजमानं कुर्यादिति सूत्रं तदात्मसंस्कार
त्वात्तद्धर्ममात्रादित्यादित्यादिवाकशेषादुपवासविसुक्रमणादिपरमेव। यत्तु। मनसा नैमित्तिकं कर्मेत्यादि तेनात्मदेवस
र्वकर्म चिंतनं विधीयते इति। एवं प्रोषितेस्वामिनि पत्नीचेदुदक्या तदाऽग्निहोत्रादि घहूतमेव भवति। योगानिर्वाहात्। किं
तु। अशक्तौ मनं सोढ्येन माचारमनुपालयेत्॥ इति वचनात् प्रोषितस्य च मनसा सर्वकर्म चिंतनविधानान्नैव द्र
व्यत्यागानुत्पाद इति। एवं च प्रोषितस्वामीपाशौचं मरणोत्तिष्ट गतयाच पत्न्या तन्न कृतं तदापत्न्याऽशौचाभावात्त
या कार्यमेव देवयज्ञादिमता हस्याद्वादिच। यजमानस्याश्रवणेपत्न्या अश्रवणे तस्याएव तदाप्रधान्यात्तत्संबं
धेन पाकस्य दुष्टत्वान्न कार्यं। यजमानस्तु पश्चादात्मजपादिरूपं वैश्वदेवादिलोपप्रायश्चित्तं कुर्यादिति॥
अथ प्रवेशविधिः। यजमानस्य गृहागमने मत्यावाग्यमनं। गुर्वादेरभिवादनं। सयघय्यं तरेणजायस्यान्नैव
तमुपेयादिति श्रुतेः। ततः। ॐ गृहामाविभीतेत्यादिति पहूतोगृहे पुनरुत्तमंत मंत्रेण गृहोपस्थानं। केचित्तु दे
मावः गंत्यै प्रपद्ये इति मंत्रेण प्रवेशमिच्छंति। ततः स्मार्त्ताग्निप्रणाम्य पुत्रं दृष्ट्वा जपति॥ ॐ अंगादंगात्संभवसि हृ
दयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतं। इति प्रति पुत्रं पुत्रसंस्कारत्वान्मंत्रावृत्तिः। पुत्रसमू

५२ र्धानमव जिघ्रति॥ ॐ प्रजापते ष्ट्वा हिंकारेणाव जिघ्रामि। सहस्रायुषा॥ अमुकशर्मन्। संजीव शरदः शतमितिमं
त्रेण। पुनस्त्रिरव जिघ्रति। ॐ गवां त्वा हिंकारेणाव जिघ्रामि सहस्रायुषा। संजीव शरदः शतमिति। सकृत मंत्रे
52 ण। द्विस्तूष्णीं। एकद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनं कृतत्वादिसुकृत्वात्॥ अथास्य पुत्रस्य दक्षिणे कर्णे जपति
ॐ अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीरांछश्व
त इंद्र शिप्रिन्॥ इति॥ अथ वामकर्णे। ॐ इंद्र श्रेष्ठा। वाचः। स्ठ दिनत्वमस्मा। इति प्रति पुत्रं दुहितृणां तु तूष्णीं
मूर्धावघ्राणमात्रं। तदगृह्योक्तमहिंसा॥ यद्यप्येतो रात्रिं सुकृध इति वत्सात चौ एवत— ते कुर्योत्नाव द्वेषि
कृतेः। इति प्रवेशविधिः। अथ सांग्रः प्रवासविधिः। आमगच्छन् गार्हपत्यादाहवनीयदक्षिणाग्न्यारुद्धरणं। नर्येति
गार्हपत्योपस्थानं। नर्य प्रजां मे पाहि। आहवनीयस्य शंस्य पशून्मे पाहि। दक्षिणाग्न्युपस्थानं अथर्य पितृं
मे पाहि। गमनं। वाग्विसर्जनं। यथाकालं प्रत्यागमनं। अग्निहोत्रे उदकमभ्युक्षणं। वृष्टिरसि वृत्रं इदमग्नये इदं प्र
जापतये। आगतदिदं सूर्यमतीति विशेषः। विद्युदसीति पुनर्भक्षणमदकस्य दर्शपूर्णमासयोर्दूध पूरणादि एप
आभिध्यानं प्रणीताप्रणयनं। प्रोक्षणीपात्रविवेकं। पवित्रछेदनपूर्णपात्रासादनं। पवित्रकरणं। प्रोक्ष ५२

णी: संस्कृतस्य पूर्णपात्रस्य प्रोक्षणं। वेदोसीति पठनं। इदं त्रिताय। इदं द्विताय। इदमेकताय। पवित्रग्रहणं। आज्यस्य। अथा
जानु-अरणं। स्वदूष्मपरिमार्गः। मयीदमिति जपः। पूर्णपात्रग्रहणं। विष्णुक्रमणं। आज्ञीकरणं। सूर्यावेक्षणं। प्र
दक्षिणावर्तनं। प्राणायामनं। पुत्रनामग्रहणं। व्रतावसर्ग इति। पर्व सर्वत्र नित्येषु। यदसांनिपातिकं कर्म तत्सोष्यितोपि
करोति-अगच्छतोमस्यावाग्यमनं। समित्पाणिरनुपेत्य कंचित्। उपतिष्ठत आहवनीव गार्हपत्य दासमन्तनी
नां मगन्मेति प्रतिमंत्रं। अगन्म विश्व· पर्छस्व। आहवनीवे उपविश्य समिदाधानं। परिसमूहनजक्षेपः। एवं गा
र्हपत्येगम्यमाति गृह· पर्छस्वा समिन्न परिसमूहनानि चोपविश्य। दक्षिणाग्नै। अमन्त्रिः पुरीष्योरपि· पर्छ
स्वा समित्परिसमूहनानि च। तूष्णीं चोपस्थानं गच्छतश्चागच्छतश्च्य। गृहामाविभीतेति गृहानुपैति। गृहामाबि-
मान्तः। अविंशतिं क्रमापवः शंयोः। तदहर्गृहाणामहिंसा। पुत्रं दृष्ट्वा जपति। अगादगा· शंत· अथास्यमूर्धा
नमवजिघ्रति प्रजापतेष्ट्वा हिंकारेण। वजिघ्रामिस्हस्रायुषासौजीव शरदः शतं:। गवां त्वा हिंकारेणावजि
घ्रामि सहस्रायुषामुकशर्मन्तूजीव शरदः शंतत्रिः। शिरसोवघ्राणं। दक्षिणेस्य कर्णेजपति। अस्मे प्रयंधि
मघवन्नजिबीनिं द्रारायो विश्ववारस्य भूरेः। अस्मे शतं दः शरदो जीवसेधा अस्मे वीरान्छश्वतं इंद्र शिप्रिन्नास में

५३ हुतं इंद्रश्रेष्ठानि ति। स्त्रियैतत्कार्ध्वनमेकावज्जिघ्राति तत्सर्वं॥ इति प्रवासविधिः॥ अथ निरग्निना प्रवासे स्वीयपाक
संभवे तत्रैव वैश्वदेवः कार्यः। तदसंभवे एवं गृहे पुत्रादिभिः कार्यः। साग्नेस्तु वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि पं
53 चयज्ञविधानं च पंक्तिं चान्वाहिकीं गृही। इति नियमश्रवणात्। तथानाहिताग्नेः स्वकं कर्म लौकिकेऽग्नौ विधीय
ते इति निषेधश्रवणात्। प्रवासे वैश्वदेवासंभवात् पाकासंभव एव। अन्यथा अघं स केवलं भुंक्ते इत्यादिदोषात्। तेन
साग्निकेन प्रवासे दुग्धान्नप्रिपक्वफलान्येव भक्षणीयानि। अकुत्सितश्रोत्रियान्नं वा। केचित्तु पचनयादि कुर्वीत प्र
वसन्नग्निमान्यदि। पंचयज्ञविधानं तु लौकिकेऽग्नौ विधीयते। इत्यादिवचनात् साग्नेरपि प्रोषितस्य पाकमिच्छंति। तदप्य
त्यंताशक्तविषयं। तस्मिन् पक्षे गृहे वैश्वदेवो न कर्तव्यः। यदि पुरस्तान्नात् गृहे पितृपुत्रादि वैश्वदेवं करोति। तथापि त
स्याविहितानुष्ठानमात्रत्वाददोषः। तदेतद्वैश्वदेवादि पित्राजीवत्प्रातावासह अविभक्तधनेन पुत्रकनिष्ठभ्रात्रादिना
प्यविशेषात्कर्तव्यं। यः पुनरयमकरणसमाचारः स पित्रादिभिः साधारणद्रव्येणाक्रियमाणेऽपि कर्मणि स्वस्व
त्वांशत्यागरूपप्रधानस्य अनुमतिमात्रेणापि यथा कथंचित् निर्वाहेण प्रसवावसपरिहारस्यादेवेत्येतावन्मात्रमूलो रम
न त्वनधिकारप्रयुक्तः। पंचयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी। तस्य नायं च न परो लोको भवति धर्मतः। गृहस्थधर्मैव ५३

वर्ज्जितेपंचयज्ञविवर्ज्जिताः।अमिषिणिस्रोतुसर्वेवैश्वदेवाश्चप्रकीर्त्तिताः।अश्ववरस्यतुभुक्तानांद्विजश्चांद्रायणंचरेत्।अश्ववर
स्यकुतोदानंदत्वादानफलंकुतः।इत्यादिवाक्येर्गृहस्थमात्रस्यावश्यकताबोधनात्वैवाहानंतरमेवचगृहाश्रमित्वप्राप्ते
अतएवविवाहानंतरंततःपंचमहायज्ञान्नकुर्यादहरहर्द्विजइतिसंवर्त्तेनोक्तं।यत्तु।सर्वेषामनुमत्याचज्येष्ठेनैवचयत्
कृतं।द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेदिति।तत्प्रेतक्रियामात्रविषयं।यत्तुनरैकपाकेनिवसतांपितृदेवद्विजार्च
नं।एवंभवेद्विभक्तानांतदेवस्यात्गृहेगृहे।इतितद्विभागप्रकरणे।एवंसहवसेयुर्वापृथग्वाधर्मकाम्ययेतितद्विभा
गस्यधर्मसाधनत्वमुक्तं।तदुपपादनार्थत्वेनार्थवादएव।नपुनर्वैश्वदेवप्रकरणाम्नातं।तस्मादविभक्तैरपिकर्त्तव्य
एववैश्वदेवइति॥ ॥अथसाग्निकस्यप्रवासापराग्निपक्वभोजननिषेधवाक्यानिलिख्यंते।चातुष्प्राश्यइडाभक्षादि
कंकुर्यादृत्विग्जिज्ञेक्रियमाणेऽक्रत्वाविहितत्वात्तद्व्यतिरिक्तस्यवचनादन्यत्रसाग्निकस्यपराग्निपक्वभोजननिषेधः।तत्रशौनकः
पराग्निपक्वंनाश्नीयादुत्तरोगोरसमंतरा।आहिताग्नेरयंधर्मोयाज्ञिकानांचसंमतः।तथा।अन्याग्निपक्वंनाश्नीयाद्विनाच
गुडगोरसौशाकपिण्याकसक्त्वादीन्याममधाम्लफलादिकं।तथाचाथर्वपरिशिष्टे।इक्षोर्विकाराणशांकचफलमूल
घृतंपयः।सक्तुचूर्णंचचूर्णंचक्षौद्रंचलवणादिरंतथा।वर्जयित्वातुभुंजंतिपराग्निपचितंतुये।तेसाग्निकाःपुराणा

५४ जायंते ब्रह्मराक्षसाः। इत्युक्तार विकारांश्चाप्याप्नुवंस्तथापरा:। अनाग्निपक्वं विज्ञेयं प्रवासे ऽग्निहोत्रिणां। वचनं पु
राणे। पंचत्वमिये लौकिकाग्नौ अज्ञानालस्यसंभवात्। विदेशे वा स्वदेशे वा भोज्यनायनराधमाः। देशभंगे प्रवासे वा व्याधि
तैर्व्यसने ऽथवा। अन्यस्मिन् केनचित् कार्ये भोजनायनराधमैः। तथा। पराग्निपक्वं नाश्नीयात्सर्वेणि प्रोषितो ऽग्निमा
न् इति। स्मृतिसंग्रहे विष्णुकात्यायनौ। दर्शे वा पौर्णमासे वा पराग्नौ पाकसेवनात्। आधानं च कृतं नश्येत्तस्मादिति सं
ग्रहे विष्णुकात्यायनौ। दर्शे वा पौर्णमासे वा पराग्नौ पाकसेवनात्। आधानं च कृतं नश्येत्तस्माद्वर्जेत बुद्धिमान्। अन्य
दाप्यथ कुर्वाणः पराग्नौ पाकसेवनात्। आधानं च कृतं नश्येत्तस्माद्वर्जेत बुद्धिमान्। अन्यदाप्यथ कुर्वाणः पराग्नौ पा
कसेवनं। संवत्सरकृतं तस्य पुण्यं चैव तु लुप्यते। तथा पक्षहोमं प्रकुर्वीत प्रवसेदग्निमान्यदि। पंचयज्ञविधानं तु लौकि
के ऽग्नौ विधीयते। तथा च परिशिष्टे। अन्यदा च समारोपे नैव कुर्यात्कदाचन। इति याज्ञिकसंवादः स्फुटमेवं न संशयः। कु
र्यात्स्मानसिकं तत्र वैश्वदेवं न लौकिके। याज्ञिकैः क्रियते चैवं महद्भिः शास्त्रदर्शिभिः। यज्ञपार्श्वे। एककहोमे कृते वह्नौ
समारूढे कथंचन। पंचयज्ञविधानं तु लौकिके ऽग्नौ विधीयते। पचनं यदि कुर्वीत प्रवासे चाग्निमान् द्विजः। समारो राम
पे कृते चाग्नौ वैश्वदेवं तु लौकिके। पत्नी यद्यपि यजमानो ऽथ प्रवासे गच्छतो स्तयोः समारोपेततः कुर्याद्वैश्वदेवं परा ५४

ग्निना। मनुः।। प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्यन्तात्। यस्मिन्नग्नौ भवेत्साकौ वैश्वदेवस्तत्र वै। एतद्वचनानु
सारेण यदा समारोपं विना ग्रामान्तरमेकीयदा गच्छेत्तदा लौकिकाग्नौ वैश्वदेवो निषिद्धः। तथा च मनुः। सायमन्नस्य
सिद्धस्य पत्न्यमंत्रं बलिं हरेत्। वैश्वदेवं हि नामैतत्सायंकाले विधीयते।। विष्णुपुराणे।। पुनः पाकमुपादाय सायम
प्यवनीपते। वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत्। येषां शारीवनां सायं वैश्वदेवो नोक्तः। तेषामप्येतद्बलिहो
मपाकसंस्कारार्थं वैश्वदेवस्थाने उक्तः। प्रवासे वैश्वदेवनिषिद्धौ हि वैश्वदेवं विना पराग्निपक्वं न भुंजीतेति पराग्निप
क्वं नाश्नीयादिति निषेधाच्च।। यदुक्तं। कुर्यान्मानसिकं तत्तु तर्हि रहोत्राग्रहे क्रियमाणे वैश्वदेवकाले मनसि
तद्वैश्वदेवस्य स्मरणं कार्यं त्यागहंतकारसंकल्पत्र्यदत्तमन्त्रादिकं प्रवासे यजमानः स्वयमेव यथोक्तं कुर्यात्। वै
श्वदेवं तु गृहे कुर्यान्न लौकिकेग्नौ यजमानः कुर्यादिति। अशक्तस्य वैश्वदेवात्पूर्वमन्नभोजने क्रियमाणे न दोषः
एभिर्यज्ञपार्श्वादिवाक्यैर्यदा समारोपे साग्निकः सपत्नीको रण्णीसहितो गच्छेत्तदा लौकिकाग्नौ पाकं कृत्वा तद
ग्निमध्ये वैश्वदेवपूर्वकं लौकिकाग्निपक्वं भुंजीत। अन्यदापि कदाचित्समारोपस्य असंभवे करोति तदा लौकिका
ग्निपक्वपाके भोजनं न कुर्यात्। वैश्वदेवदोषत्वात्। तदुक्तं स्मृतौ। भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात्। यज्ञशि

५५ शाशिनः संतो मुच्यते सर्वकिल्बिषैः॥ अन्यदा न कदाचिदपि साग्निको वैश्वदेवशेषं विना पराग्निपक्वं नाश्नीयात्। तथा च
आपस्तंबपरिशिष्टे। पराग्निपक्वं नाश्नीयात् कुडगोरससंततम्। आहिताग्नेरयं धर्मो ऽन्यथा दोषभाग्भवेत्। प्रवसंन
ग्निमान्विप्रः पयो ऽश्नीयात्फलान्यपि। अशक्तौ तु पचेदन्नं भुंजीत विधिपूर्वकं। तदा भुंजीत विधिपूर्वकमिति। अस्या
र्थः। ब्राह्मणगृहात्तदभावेन्यगृहाद्वाग्निमानीय तस्योपरि विशुद्धं शुष्कं गोमयपिंडं शुष्कं काष्ठं वा धारयित्वा त
55 त्ज्वालितं गृहीत्वा पूर्वमग्निं विहाय तद्गृहीतं स्थानांतरे स्थाप्य पुनरन्यं तस्योपरि धारयित्वा एवं त्रिवारं कृत्वा
पश्चात्तत्तदर्थमग्निं गृहीत्वा पाकः कार्यः। वैश्वदेवं च कृत्वा भुंजीत। अन्नसंस्कारार्थत्वाद्वैश्वदेवः। यस्मिन्नग्नौ भवेत्पा
को वैश्वदेवस्तत्र चेममनेन मनुवचनेन गृहे कोरहोत्राकृते सति पुनरशक्तयजमानस्यापि वैश्वदेवोपि विहि
त इति। आह्निकं द्विवारं न कुर्यादिमस्यापवादोनेन वचनेन। यदि किंचिद्दिनानि तिष्ठेत्तदा संस्थापयेत्। यावद्दै
घः कार्यानुसारेण पूर्णभोजनं न ददाति तावन्निमंतदग्निपक्वमन्नं भुंजीतात दुक्तं। ज्वरितो रोगी वियोगी वापि पाकं
कृत्वा तु भोजनं। सामर्थ्ये च पुनर्जाते नैवाश्नीयात्पराग्निना। यदा गच्छेत्तदा गच्छत्सु रथ्रेष्टं तिवा यंज्ञमित्वा ग्निशां रम
तं कृत्वा व्रजेत्। कुत एतत्। तेनाग्निना अन्यस्य पाके दोषो स्ति। अतो मस्यनदेयमिति। एवं आपस्तंबपरिशिष्टे ५५

कं। केशवस्वामिना निरूपितमशक्त्या दर्शपौर्णमासी तदपि नग्राह्या ग्रंथांतरे। दर्शपौर्णमासविषये बाधश्च वर्णितः। गोरस
श्च गुडो वायफलमूले द्रवस्तथा। पराग्निपक्वं यत्किंचित् शाकमाद्यं तथैव च। साग्निः पर्वणि नाश्नीयात् प्रवासे सर्वदा बु
धैः। गृहे चैव न दोषः स्यादाज्यादीनां तु पर्वणि। प्रवासे दर्शपूर्णमासयोः स्वतरां पराग्निपक्वनिषेधात्। पराग्निपक्वमु
ष्णोदकमपि न पिबेत्। शीतनिवारणार्थे प्रवासे पर्वणि पराग्निं न सेवेत। प्रवासग्रहणाद् गृहे न दोषः। तथा च स्मृतिभास्क
रे हारीतः। हिंगु केन्द्री रंगुडो घृतं। आधाने द्वारनिष्कुर्वीयावद्देहस्य धारणं॥ पराग्निपक्वं नाश्नीयाद् दुत्संनाग्निस्कसर्व
दा। धनमर्जयितुं दूरे आहिताग्निर्गतो यदा मुनन्नान्नमपक्वं। अग्निमागे यथोक्तं प्रायश्चित्तं तदैव तु। प्राजापत्यानि कु
र्वीत भोजने भोजने कृवं। तस्मादेवं न कर्तव्यं पक्वं लौकिकाग्निना बुधैः। उत्सन्नाग्निर्विदोषेण भोजनं न कुर्यात् कचित्
दर्शं च पौर्णमासं च विना चैव तु साग्निकः। नांतरा वपनं कुर्यान्मातापित्रोर्मृतं विना। उत्सन्नाग्नेस्तथैव स्याद्वपनं
नैवं विधते। अनग्नि द्विजवद्धर्मो वैश्वदेवं विनायतः। प्रदीपचंद्रिकायां तत्त्वन्यहोमे ऽर्धफलं स्मृतं। यजमाने प्रवास
स्थे तुरीयांशफलं सदा। तथा च॥ यजमाने प्रवासस्थे पत्नी यदि रजस्वला सूतिका वा भवेद्वापि अष्टमांशफलं तदा
जमाने समीपस्थे यानेदो न लभते फलं। होमाधिकारे जाते तु तुरीयांशं लभेत्कृवं। न्यूनं फलं भवेद्यस्मात् प्रवासे चै

व सर्वदा। न कुर्याद् द्रूपनं तस्मात्प्रवासे पर्वणोः सदा। साग्निकस्य परान्निपक्वभोजने प्रतिदिनं प्राजापत्यं। दर्शपौर्णमासे षड्गुणं
५६ उक्तं नाग्निः प्रतिदिनं विवाहोन्मुखस्य प्राजापत्यं। कृते विवाहे द्विगुणं। अविवाहोन्मुखस्य त्रिगुणं। अनग्निकस्य वपने प्राजा
पत्यं। उक्तं त्वाग्नेश्च प्राजापत्यं। साग्निकस्य परान्निपक्वभोजने प्राजापत्यं। उक्तत्वात्कस्य विदपि गृहेष्वाद्धादौ न भोक्तव्यं।
56 यत्तु माङ्गकृत्व वचनं। कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निर्ब्रह्मचारिणः। पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदे। तत्र पंचाग्नि
शब्देन पितृपाकोपजीवी मत्रात् पाकोपजीविच्या। स्वावसथ्याग्नौ वैश्वदेवं विना पाकाभावात्तेन परश्राद्धे भोक्तव्यं। परपा
करुचिनस्यादनिंद्यामंत्रणं दत्ते। एतद्वचनमपितृस्य। अनिंद्येनामंत्रितो नापक्रामेदितिपितृस्य। चतुर्विंशतिमते। स्वयं जा
पी स्वयं होमी परपाकनिवर्त्तकः। विप्रः प्रतिग्रहस्तेभिश्चकाद्य विलुप्यते साग्निकं विनापि। एवंविधेन एतद्वचनानुसारेण प
रश्राद्धे न भोक्तव्यं। एवंविधादितरेण अनिंद्यविप्रगृहे भोक्तव्यं कृतनियमत्वात् तस्यापं मनुनोक्तो विधिः। प्रवर्त्तितप
यि दि कथंचिद् अपक्रामेत्पापः शूकरतां व्रजेत्। अथवा पंचाग्निशब्दः प्राणाग्निहोत्रविषयः। यथा। ब्रह्मचारीशब्द
स्त्वविधगृहस्थविषयः। हारीतेन गृहस्थस्य चतुर्विधत्वमुक्तं। अथवा श्राद्धे विप्रपरिक्षानियमार्थप्रशंसाविषयं। ए राम
तद्विधिः राजसतामसानां। न तु साग्निकानां। तदुक्तं पुराणे। देवीप्रतिभगवद्वचनं। वैष्णवं नारदीयं च तथा भागवतस्य ५६

तं गारुडं च तथा पाद्मं वाराहं शुभदर्शनं। सात्विकानि देवि ज्ञेयानि पुराणानि शुभानि वै। ब्रह्मांडं ब्रह्मकैवर्त्तं मार्कंडेयं तथै
व च। भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे। मात्स्यं कौर्म्मं तथा लैंगं शैवं स्कांदं तथैव च। आग्नेयं च षडेतानि तामसानि नि
बोध मे। तथैव स्मृतयः प्रोक्ताः सर्वा वै त्रिगुणात्मिकाः। वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा। काश्यपं भारद्वाजं च सा
त्विका मुक्तिदाः शुभाः। मानवं याज्ञवल्क्यं च आत्रेयं दाक्षमेव च। कात्यायनं वैष्णवं च राजसाः सुखदाः स्मृताः। बार्हस्पत्यं गौ
तमं च संवर्त्तं च यमस्मृतिः। शाखं चौशनसं देवि तामसा निरयप्रदा॥ तथा च। न पचेदन्नमात्मनः इत्यनेन आत्मार्थं वैश्वदेवं वि
ना पाककरणनिषेधः। एके च वैश्वदेवस्य वा देवस्य वा नैवेद्यार्थं पाककरणं मन्यते तत्स्तु यपत्न। यथा। वसेत्स नरके घोरे दि
नानि पशुरोमभिः। संमितानि दुराचारो यो हन्त्यविधिना पशून्। परमेश्वरस्य नैवेद्यार्थं पशुहननविधिः संभवतीति। पशु
हननविधिर्वैश्वदेवे विहितः। अन्नपचनविधिर्वैश्वदेवे विहितः। तथा च पुराणे। आत्मार्थं तु पचेदन्नं सुखार्थं यस्य मैथु
नं। वित्तार्थं पठते वेदान् स नरके। वहि निमज्जति। यथा च। वैश्वदेवार्थं पचेदन्नं पुत्रार्थं यस्य मैथुनं। पुण्यार्थं पठते वेदान् धर्मार्थं
तस्य जीवनं। यथा वृथा कृशरकं पायसापूपशष्कुलीः। एतै वैश्वदेवनिषेधाद्ब्राह्मणभोजनादिनिमित्तं विना परमेश्व
रस्य नैवेद्यार्थं एतानि न कानि न भुंजते। यथा। श्रुतिस्मृती मम एवाज्ञा न यो रुल्लंघ्य वर्त्तते। आज्ञाभंगी मम द्रोही मद्भक्तोपि न

सात्विकः। तथा। अनुक्तशास्त्रमार्गेण देवपूजां करोतीति यः। तेहरेद्रोहिणः पापात्प्रायश्चित्तेन शुद्ध्यति। स्वकीयं धर्ममुत्सृज्य दृ
५० ष्टकृत्सेतिवादिनः। धर्मस्तेयः स विज्ञेयः स्तेमद्देयाः। स दैवहि। वैश्वदेवं विना अन्नं न पचेदिति शास्त्रे सति श्रुतिस्मृतिविरोध
भयात्परमेश्वरस्यनैवेद्यार्थं अन्नं न पचेदिति शास्त्रे सति श्रुतिस्मृतिविरोधभयात्परमेश्वरस्यनैवेद्यार्थं अन्नं न पचेन्नात्री
यादिति नियमः। वारि विना यदन्नं तु पक्वं केवलपावकेन तदन्नं फलवत् ग्राह्यं नो चेत् धर्ममनुरब्रवीत्। इत्यादि शुनदोषः। अत्र
स लवणोदकं योगे च अग्निलवणसंयोगे वा घृतवत् गुडयोगे च न दोषः। तंडुलेषु अग्निसंयोगात् पिष्टं लवणयोगतः। पानीयमग्नि
संयोगात् स्पर्शदोषो हि जायते। स्पर्शत्वनिषेधात्। अन्नशब्दस्तस्य न भवति उदकं विना केवलक्षीरे तंडुलेयः पाकः संभव
ति तस्यापि अन्नशब्दः पायसान्नेन ब्राह्मणान्भोजयेदिमनेन वचनेन अन्नशब्दो दृश्यते तस्मात्तस्य विकल्पः। अथ उदकल
वणादिसर्वयोगेन यत्पक्वं तं निषिध्यते। महानसे पाकार्थमग्निमुद्धृत्य कृते पाके पुनः संसर्गकृते सातिशयो अग्निर्महान
सीयः स लौकिक इति। तथापि लौकिकस्य अन्नस्य दाने पाके च शूद्रस्पर्शे महान दोषः। अपरं तु कर्म लौकिको र्थसंयो
गादित्युक्ते सति कृते होमे लौकिकोपि आहवनीयदक्षिणाग्नेः ~~अन्नस्य पाके शूद्र~~ स्पर्शे महान् दोषः। इत्यादि तस्य लौकि एम
कसंज्ञकश्चित् तस्यापि दोष उक्तवा घटस्य गृहे स्वावश्यो पाककरणे असंभवो भवेत्। तदा केशवस्वामिना अ ५०

नुकल्प उक्तः। प्रातर्वैश्वदेवार्थे महानसेऽग्निसुसंस्कृतपाकानंतरं संसर्गे कृते सति तद्धेयाग्निर्लौकिको भवेत्। तल्लौकिकाग्नि
पाकेन दोषः। तदग्निपचितान्नभोजनेन दोषो न प्रायश्चित्तं। तद्भोजनं किंचिन्न्यूनफलदं भवेत्। तदग्निपचितान्नभोजनेन ब
लिदाने प्राणाग्निहोत्रं वैश्वदेवशेषेण कुर्यादिति कारिकादिष्वनुकल्प उक्तः मुख्यकल्पाभावे अनुकल्पोऽग्राह्यः। इति प्रवा
सविधिः। श्रीकृष्णचरणद्वंद्वमाधाय हृदयांबुजे। सिद्धेश्वरदत्ततनूजेन काशीपुरनिवासिना रचितः श्रीनृसिंहेन प्रवासवि
धिनिर्णयः।। ग्रंथ सं: १५००

॥स्नाने दाने जपे होमे स्नाध्यायेपितृतर्पणे॥सपवित्रौसदर्भौवाकरौकुर्वीतनान्यथा॥

58

॥पुस्तमिदंसिद्धुमहतन्नु जेन कासीपुरनिवासिनो विरचितः श्रिन्नसिंहेन प्रवावियि निर्णयः॥

५८ प्रकासविधि

१५००